श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला-१०

# वाक्यार्थज्योतिः
# Vākyārthajyotiḥ

अङ्कः - 2 वर्षः - 2015-16

प्रधानसम्पादकः

**प्रो. अर्कनाथचौधरी**

सम्पादकौ

**डॉ. पङ्कजकुमारः रावलः**

**डॉ. शत्रुघ्नपाणिग्राही**

श्रीसोमनाथसंस्कृतयुनिवर्सिटी

वेरावलम्

Scanned with CamScanner

प्रकाशकः -
प्रो. महेन्द्रकुमारः दवे
का.कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवनरोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातम्
दूरभाष : ०२८७६-२४४५३२, फेक्सः २४४४१७
www.sssu.ac.in

सहसम्पादकः समन्वयकश्च -
डॉ. कार्तिकपण्ड्या
संशोधनाधिकारी
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

© Shree Somnath Sanskrit University, Veraval - 2018

प्रथमं संस्करणम् - मई - २०१८

प्रतयः - ३५०

ISBN - 978-93-83097-27-2

मूल्यम् - रु. २०० /-

मुद्रकः - जलाराम ग्राफिक्स एन्ड ओफसेट
परमहंस अेपार्टमेन्ट के पास,
होटल कावेरी के पीछे, एस.टी.रोड, वेरावल-३६२ २६६
जि. गीर सोमनाथ, गुजरात (भारत)
दूरभाष : (०२८७६) २२१८६१

Scanned with CamScanner

# विषयानुक्रमणिका

१ विध्यादयोऽर्थाः लिङः वाच्याः द्योत्या वा ०१-०३

प्रो. अर्कनाथचौधरी

२ यज्ञानां वैज्ञानिकता ०४-१२

प्रो. लम्बोदरमिश्रः

३ चिकित्साक्षेत्रे ज्यौतिषस्य योगदानम् १३-२७

प्रो. वासुदेवशर्मा

४ ग्रहाणां बलवैविध्यम् २८-४७

प्रो. हंसधरझा

५ वैदिकदेवशास्त्रम् ४८-५६

प्रो. देवेन्द्रनाथपाण्डेयः

६ काव्यदोषविमर्शः ५७-७१

डॉ. नरेन्द्रकुमारपण्ड्या

७ महाभाष्यस्य आलोके दृष्टप्रयोजनदृष्ट्या "न धातुलोप आर्धधातुके" सूत्रस्यानावश्यकत्वप्रतिपादनम् ७२-८३

प्रो. विनोदकुमारझा

८ रम्या रामायणी कथा ८४-९४

प्रो. महेन्द्रकुमारदवे

९ ध्वनिः, ध्वनिप्रपञ्चः, तत्प्रयोजनश्च ९५-१०४

डॉ. ललितः पटेलः

१० पाठ्यन्ते पशुनिर्भराः १०५-१२०

डॉ. पङ्कजकुमारः रावलः

Scanned with CamScanner

# महाभाष्यस्य आलोके दृष्टप्रयोजनदृष्ट्या "न धातुलोप आर्धधातुके" सूत्रस्यानावश्यकत्वप्रतिपादनम्

प्रो. विनोद कुमार झा
अध्यक्षः- व्याकरण-संकायः
श्री सोमनाथ संस्कृत युनिवर्सिटी, वेरावलम्।

प्रस्तावना- पाणिनि-व्याकरणे गुण-वृद्धिनिषेधसूत्रेषु अन्यतमं सूत्रमस्ति- "न धातुलोप आर्धधातुके"। त्रिपदात्मके सूत्रेऽस्मिन् न- अव्ययपदम्, धातुलोपे- ७/१ तथा च आर्धधातुके- 7/1 विद्यते। अत्र सूत्रे धातु-शब्दो धात्ववयवस्य बोधको वर्तते। धातुलोपे इत्यत्र बहुव्रीहि-समासोऽस्ति, यथा- धातोर्लोपो यस्मिन् तदिदं धातुलोपम्, तस्मिन् धातुलोपे। अत्र "इको गुणवृद्धी"[1] इति सम्पूर्णस्य सूत्रस्य अनुवृत्तिरागच्छति।

सूत्रस्य अर्थः, उदाहरणं प्रत्युदाहरणञ्च- एवम्प्रकारेण सूत्रार्थो जायते- यस्मिन्नार्द्धधातुके धातोरवयवस्य लोपो भवति, तस्मिन्नेवार्द्धधातुके प्रत्यये इकः स्थाने ये गुणवृद्धी प्राप्नुतस्ते न भवतः। उदाहरणानि सन्ति- लोलुवः, पोपुवः, मरीमृजः, सरीसृपः। मरीमृजः, सरीसृपः अत्र "रीगृदुपधस्य च"[2] इति सूत्रेण अभ्यासस्य रीगागमो भवति। उदाहरणेषु गुणाभावस्य कारणं विद्यते यत् 'लोलुवः' इत्यत्र 'लोलूय+अ' (अच्), 'पोपुवः' इत्यत्र 'पोपूय+अ' (अच्) इत्यवस्थायां "यङोऽचि च"[3] इति सूत्रेण अकारे अचि परे यङन्तस्य 'लोलूय' धातोः 'पोपूय' धातोश्च धात्ववयवस्य यकाररूपस्य यङ्-प्रत्ययस्य लुग् भवति। एवमेव 'मरीमृजः' इत्यत्र 'मरीमृज्य+अ' (अच्), 'सरीसृपः' इत्यत्र 'सरीसृप्य+अ' (अच्) इत्यवस्थायां "यङोऽचि च" इति सूत्रेण अकारे अचि परे यङन्तस्य 'मरीमृज्य' धातोः 'सरीसृप्य' धातोश्च धात्ववयवस्य यकाररूपस्य यङ्-प्रत्ययस्य लुग् भवति। सूत्रस्य प्रत्युदाहरणं यथा- धातुग्रहणं किम्- इह मा



भूत्। लूञ्-लविता, लवितुम्। पूञ्- पविता, पवितुम्। "अनुबन्धविनिर्मुक्तपदार्थस्य उपस्थितिर्भवति" इति परिभाषानुरोधेन लूञ्, पूञ् इत्यत्र पूर्वम् अनुबन्धलोपो भवति तदनन्तरं "भूवादयो धातवः"4 इति सूत्रेण धातुसंज्ञा जायते, तस्मात् लूञ्, पूञ् इत्यत्र ञकार-लोपः धात्ववंशलोपो न कथ्यते, अतः धात्वंशस्य लोपाभावात् लविता, लवितुम्, पविता, पवितुम् इत्यत्र क्रमशः लो+इ तृ (तृच्), लो+इ तुम् (तुमुन्), पो+इ तृ (तृच्), पो+इ तुम् (तुमुन्) इत्यवस्थायां "सार्वधातुकाऽऽर्धधातुकयोः"5 इत्यनेन प्राप्तस्य गुणस्य "न धातुलोप आर्धधातुके" इति सूत्रेण निषेधो न क्रियते। आर्धधातुकग्रहणं किम्- रोरवीति। 'रोरवीति' इत्यत्र रोरु[6] +ई ति इति दशायां "सार्वधातुकाऽऽर्धधातुकयोः" इत्यनेन प्राप्तस्य गुणस्य "न धातुलोप आर्धधातुके" इति सूत्रेण निषेधो न क्रियते, गुणस्य सार्वधातुकप्रत्ययनिमित्तत्वात्।

आर्धधातुकग्रहणं लोपविशेषणम्- महाभाष्यदृष्ट्या प्रतिपादितस्य विषय-वस्तुनः सम्यग् ज्ञानाय धात्वंशलोपे सति आर्धधातुके प्रत्यये इकः स्थाने ये गुणवृद्धी प्राप्नुतस्ते न भवतः, सूत्रार्थमिदम् इदानीं विस्मर्तव्यम्। महाभाष्ये सूत्रस्यास्य पदकृत्येन सह कस्य पदस्य किं पदं विशेषणमस्ति इति प्रतिपादयता भाष्यकारेण उच्यते- आर्धधातुकस्य लोपविशेषणे सति सूत्रार्थो भवति- आर्धधातुकनिमित्ते धातुलोपे=धात्वंशलोपे सति ये गुणवृद्धी प्राप्नुतस्ते न भवतः। अस्मिन् अर्थे इन्ध्-धातोः क्त-प्रत्यये, तत्र अनुबन्धलोपे क्त-प्रत्ययस्य (त) आर्धधातुकत्वेन "अनिदितां हल उपधायाः क्ङिति"[7] इत्यनेन तन्निमित्तके उपधा-नकारलोपे सति धात्वंशस्य उपधा-नकारलोपस्य आर्धधातुकनिमित्तत्वात् उपेद्धः (उप+इध् (इन्ध्)+क्त), प्रेद्धः (प्र+इध् (इन्ध्)+क्त) इति दशायां "आद्गुणः"[8] इति सूत्रेण गुणो न प्राप्नोति, कारणं "न धातुलोप आर्धधातुके"

सूत्रमिदं गुणैकादेशस्य निषेधं करोति।

आर्धधातुकग्रहणं गुणवृद्धिविशेषणम् - गुणवृद्धिविशेषणम् आर्धधातुकग्रहणमिति स्वीकारे सूत्रार्थो भवति- धातुलोपे=धात्वंशलोपे सति आर्धधातुकनिमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवतः। अस्मिन् अर्थे क्नोपयति (क्नूय्+पुक्+णिच्+तिप्) अत्र गुणो न प्राप्नोति, कारणमत्र प्रयोगे यकाररूपस्य धात्वंशस्य (य्) लोपो विद्यते[9] तथा च आर्धधातुकप्रत्ययनिमित्तकः (इ=णिच्) लघूपधगुणो वर्तते।

उपर्युक्त-पक्षयोर्मध्ये 'आर्धधातुकग्रहणं लोपविशेषणमि'ति पक्षस्य साधुत्वप्रतिपादनम्- उपर्युक्त-पक्षयोर्मध्ये कः पक्षरस्माभिः स्वीकरणीय इति जिज्ञासायां प्रथमः पक्षः अर्थात् आर्धधातुकग्रहणं लोपविशेषणमिति अङ्गीकरणीयम्। न च तत्र पक्षे उपेद्धः, प्रेद्धः इत्यनयोः सिद्धिर्न प्राप्नोतीति वाच्यम्, "असिद्धं बहिरङ्गमन्तरङ्गे" इति परिभाषानुरोधेन बह्वपेक्षत्वात् बहिरङ्गस्य गुणस्य असिद्धत्वेन अल्पापेक्षत्वात् अन्तरङ्गस्य गुणनिषेधस्य च सिद्धत्वेन गुणनिषेधकस्य "न धातुलोप आर्धधातुके" सूत्रस्य दृष्टौ "आद्गुणः" इति सूत्रेण जायमानस्य गुणस्य असिद्धत्वेन निषेधाभावात् वयं सदैव गुणयुक्तं उपेद्धः, प्रेद्धः रूपं पश्यामः।

आर्धधातुकग्रहणं लोपविशेषणमिति पक्षे प्रकृतसूत्रे धातुग्रहणस्य अनावश्यकत्वप्रतिपादनम्- सहैव अस्मिन् पक्षे सूत्रे धातुग्रहणस्यापि आवश्यकता नास्ति। कारणं लूञ्- लविता, लवितुम्। पूञ्- पविता, पवितुम् इत्यत्र क्रमशः लो+इ तृ (तृच्), लो+इ तुम् (तुमुन्), पो+इ तृ (तृच्), पो+इ तुम् (तुमुन्) इत्यवस्थायां "सार्वधातुकाऽऽर्धधातुकयोः" इत्यनेन प्राप्तस्य गुणस्य "न धातुलोप आर्धधातुके" सूत्रेण निषेधो भवितुं न शक्नोति, लूञ्, पूञ् इत्यत्र अकार-लोपस्य आर्धधातुकप्रत्यय-निमित्तत्वाभवात्।



उपर्युक्त-पक्षयोर्मध्ये 'आर्धधातुकग्रहणं गुणवृद्धिविशेषणमि'ति पक्षस्य साधुत्वप्रतिपादनम्- द्वितीय पक्षेऽपि अर्थात् गुणवृद्धिविशेषणम् आर्धधातुकग्रहणमिति पक्षेऽपि नास्ति कश्चन दोषः "चेले क्नोपेः"[10] इति पाणिनि-सूत्रे 'क्नोपेः' इति निर्देशे= उच्चारणे गुणस्य सत्त्वेन निपातनात् गुणकार्यस्य सिद्धत्वात्।

परिगणनमाध्यमेन द्वितीयं समाधानम्- अथवा प्रकृतसूत्रेण कुत्र गुणवृद्ध्योर्निषेधो भवेत् कुत्र च निषेधाभावः, एतदर्थं परिगणनं कर्तव्यम्। निषेधस्थलानि- यङ्यक्क्यवलोपे प्रतिषेधः। निषेधाभावस्थलानि- नुम्लोपश्विव्यनुबन्धलोपेऽप्रतिषेधार्थम्।

यङ्यक्क्यवलोपे प्रतिषेधः- यङ्यक्क्यवलोपे प्रतिषेधः अर्थात् यङ्-प्रत्ययस्य, यक्-प्रत्ययस्य, क्यच्-प्रत्ययस्य तथा च वकारस्य लोपे सति गुणवृद्ध्योर्निषेधो भवेत्। यङ्-प्रत्ययस्य उदाहरणम्- वेभिदिता, मरीमृजः। विभिद्य+इ तृ (तृच्), मरीमृज्य+अ (अच्) इति स्थितौ "आदेः परस्य"[11] परिभाषा-सूत्रस्य सहायतया "यस्य हलः"[12] इति सूत्रेण यङः यकारस्य (य्) लोपो भवति तदनन्तरं "अतो लोपः"[13] इति सूत्रेण अकारलोपो जायते। अतः अत्र विभिद्+इ तृ (तृच्), मरीमृज्+अ (अच्) इति स्थितौ प्राप्तः आर्धधातुकनिमित्तको लघूपधगुणो न भवति। यक्-प्रत्ययस्य उदाहरणं यथा- कुषुभिता, मगधकः। अत्र कुषुभ्य+इ तृ (तृच्), मगध्य+अक (ण्वुल्) इति स्थितौ "आदेः परस्य" परिभाषा-सूत्रस्य सहायतया "यस्य हलः" इति सूत्रेण यकः यकारस्य (य्) लोपो भवति तदनन्तरं "अतो लोपः" इति सूत्रेण अकारलोपो जायते। अतः अत्रापि कुषुभ्+इ तृ (तृच्) इत्यत्र आर्धधातुकनिमित्तको लघूपधगुणः तथा च मगध्+अक (ण्वुल्) इत्यत्र "अत उपधायाः"[14] इति सूत्रेण उपधा-वृद्धिर्न जायते। क्यच-प्रत्ययस्य उदाहरणं यथा- समिधिता, दृषदकः। अत्र समिध्य+इ तृ (तृच्), दृषद्य+अक (ण्वुल्) इति दशायां "आदेः परस्य"

लघूपधगुणः तथा च दृषद्+अक (ण्वुल्) इत्यत्र "अत उपधायाः" इति सूत्रेण उपधा-वृद्धिर्न भवति। वलोपस्य उदाहरणं यथा- जीरदानुः। 'जीरदानुः' इत्यत्र 'जीव्' धातुः तथा च 'रदानु' प्रत्ययोऽस्ति। अत्र "लोपो व्योर्वलि" इत्यनेन वकारलोपे सति "सार्वधातुकाऽऽर्धधातुकयोः" इति सूत्रेण प्राप्तस्य इग्लक्षणगुणस्य अभावो दृश्यते।

नुम्लोपस्रिव्यनुबन्धलोपेऽप्रतिषेधार्थम्-

नुम्लोपस्रिव्यनुबन्धलोपेऽप्रतिषेधार्थम् अर्थात् नुम्लोपे=नका- रलोपे, स्रिव्-धातोः वकारलोपे अनुबन्धलोपे च गुणवृद्ध्योः निषेधो न भवति। नुम्लोपस्य उदाहरणं यथा- अभाजि, रागः, उपबर्हणम्। अत्र अ (अट्) भञ्ज् इ (चिण्)+त, रञ्ज्+अ (घञ्), उप बृंह्+अन (ल्युट्) इति दशायां क्रमशः भञ्ज्-धातोः "भञ्जेश्च चिणि"[15] इति सूत्रेण उपधानकारलोपे, रञ्ज्-धातोः "घञि च भावकरणयोः"[16] इति सूत्रेण उपधानकारलोपे, बृंह्-धातोः "बृंहेरच्यनिटि"[17] इति वार्तिकेन उपधानकारलोपे अ (अट्) भज् इ (चिण्)+त, रज्+अ (घञ्) इत्यत्र "अत उपधायाः" इति सूत्रेण उपधा-वृद्धिः तथा च उप बृह्+अन (ल्युट्) इत्यत्र "पुगन्तलघूपधस्य च"[18] इति सूत्रेण लघूपधगुणः क्रियते। स्रिव्-धातोः वकारलोपस्य उदाहरणमस्ति- अस्रेमाणम्। 'अस्रेमाणम्' इत्यत्र अ (नञ्) स्रिव्+मन् (मनिन्) इत्यवस्थायां "लोपो व्योर्वलि" इति सूत्रेण मकारे वलि परे स्रिव्-धातोः वकारलोपानन्तरं "सार्वधातुकाऽऽर्धधातुकयोः" इति सूत्रेण लघूपधगुणो भवति। अनुबन्धलोपस्य उदाहरणं महाभाष्ये उपलभ्यते- लविता, लवितुम्। लूञ्-धातौ अनुबन्धलोपानन्तरं लू+इ (इट्) तृ (तृच्), लू+इ (इट्) तुम् (तुमुन्) इति परिस्थितौ इग्लक्षणो गुणो जायते, यथा पूर्वमपि पत्रेऽस्मिन् मया उल्लिखितम्।

न च परिगणनानन्तरं स्यदः, प्रश्रथः, हिमश्रथः इत्यत्रापि स्यन्द्-धातोः श्रन्थ्-धातोश्च नकारलोपानन्तरं स्यद्+अ (घञ्), प्र श्रथ्+अ (घञ्), हिम



श्रथ्+अ (घञ्) इति दशायां "अत उपधायाः" इति सूत्रेण उपधा-वृद्धिः स्यादिति वाच्यम्, "स्यदो जवे"[19] सूत्रे स्यद-शब्दस्य प्रयोगात्, "अवोदैधौद्मप्रश्रथहिमश्रथाः"[20] सूत्रे प्रश्रथहिमश्रथ-शब्दयोः प्रयोगात् तथा च निपातनात् एतत्पदत्रयस्य साधुत्वात् नास्ति काचिद् आपत्तिः।

तृतीयं समाधानान्तरं भाष्यम्- उपर्युक्त-प्रकारेण "न धातुलोप आर्धधातुके" सूत्रस्य सम्यक्परिज्ञानाय परिगणनं कर्तव्यं न वा इति जिज्ञासायां समाधानान्तरं प्रस्तूयते- इक्प्रकरणान्नुम्लोपे वृद्धिः। इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः अर्थात् यत्र इग्लक्षणस्य गुणस्य इग्लक्षणायाः वृद्धेश्च प्राप्तिर्स्यात् तत्रैव "न धातुलोप आर्धधातुके" इत्यनेन गुणवृद्ध्योः प्रतिषेधो भवेत्। इग्लक्षणन्नाम इक् लक्षणं=निमित्तं यस्य तद् इग्लक्षणम् अर्थात् इक्-शब्दस्य उच्चारणं कृत्वा यत्र गुणो भवति स इग्लक्षणो गुणः, इक्-शब्दस्य उच्चारणं कृत्वा यत्र वृद्धिर्भवति सा इग्लक्षणा वृद्धिः। स्यदः, प्रश्रथः, हिमश्रथः इत्यत्र नास्ति इग्लक्षणायाः अर्थात् इक्स्थानिकायाः वृद्धेः प्राप्ति, तस्मान्नास्ति कश्चन दोषः।

न च अवोदः, एधः, ओद्मः इत्यत्र क्रमशः अव उन्द्+अ (घञ्), इन्ध्+अ (घञ्) इति दशायां नलोपानन्तरम् इग्लक्षणस्य गुणस्य उन्द्+मन् (मनिन्) इति दशायां नलोपानन्तरम् इग्लक्षणायाः वृद्धेश्च सत्त्वात् "न धातुलोप आर्धधातुके" इत्यनेन इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः स्यादिति वाच्यम्, "स्यदो जवे" सूत्रे स्यद-शब्दस्य तथा च "अवोदैधौद्मप्रश्रथहिमश्रथाः" सूत्रे अवोद-एध-ओद्म-प्रश्रथ-हिमश्रथ-शब्दानां प्रयोगेण स्यदादिशब्देषु इग्लक्षणयोर्गुणवृद्ध्योः निपातनद्वारा यथाप्रयोगम् भावस्य अभावस्य च कल्पनासत्त्वात्।

न च यदि इग्लक्षणयोर्गुणवृद्ध्योः "न धातुलोप आर्धधातुके" इत्यनेन प्रतिषेधो भवति, तर्हि 'अस्रेमाणम्' इत्यत्र अ (नञ्) स्रिव्+मन् (मनिन्) इत्यवस्थायां "लोपो व्योर्वलि" इति सूत्रेण मकारे वलि परे स्रिव्-धातोः

Scanned with CamScanner

वकारलोपानन्तरं "सार्वधातुकाऽऽर्धधातुकयोः" इति सूत्रेण जायमानस्य गुणस्य निषेधो स्यादिति वाच्यम्, आर्धधातुकनिमित्तके लोपे सति इग्लक्षणयोर्गुणवृद्ध्योः प्रकृतसूत्रेण प्रतिषेधात्। प्रकृतस्थले "लोपो व्योर्वलि" इति सूत्रेण जायमानो वकारलोपः आर्धधातुकनिमित्तको नास्ति। महाभाष्ये यथा- आर्धधातुकनिमित्ते लोपे प्रतिषेधः।

न च यदि आर्धधातुकनिमित्तके लोपे सति इग्लक्षणयोर्गुणवृद्ध्योः प्रकृतेसूत्रेण प्रतिषेधो भवति, तर्हि 'जीरदानुः' इत्यत्र 'जीव्+रदानु' इत्यवस्थायां रेफे (र्) वलि परे "लोपो व्योर्वलि" इति सूत्रेण जायमानो वकारलोपः आर्धधातुकनिमित्तको नास्ति। अतः 'जी+रदानु' इत्यत्र इग्लक्षणगुणस्य निषेधाभावात् "सार्वधातुकाऽऽर्धधातुकयोः" इति सूत्रेण आर्धधातुकनिमित्तक इग्लक्षणगुणो स्यादिति वाच्यम्, प्रकृत-रूपे जीव्-धातोरभावात्। महाभाष्ये वार्तिकं यथा- रकि ज्यः सम्प्रसारणम्। अर्थात् 'जीरदानुः' इत्यत्र 'ज्या' धातुः तथा च 'रक्' प्रत्ययो वर्तते। रक्-प्रत्यये परे 'ज्या' धातोः "ग्रहि-ज्या-वयि-व्यधि-वष्टि-विचति-वृश्चति-पृच्छति-भृज्जतीनां ङिति च"[21] इति सूत्रेण सम्प्रसारणे, "सम्प्रसारणाच्च"[22] इति सूत्रेण पूर्वरूपे. "हलि च"[23] सूत्रेण दीर्घे सम्पन्नस्य जीर-शब्दस्य दानु-शब्देन सह बहुव्रीहिसमासद्वारा 'जीरदानुः' शब्दस्य सिद्धिर्भवति।

न च यदि आर्धधातुकनिमित्तके लोपे सति इग्लक्षणयोर्गुणवृद्ध्योः प्रकृतसूत्रेण प्रतिषेधो भवति, तर्हि 'उपबर्हणम्' इत्यत्र 'उप बृंह्+अन (ल्युट्) इत्यवस्थायां 'अन' इत्यस्य "आर्धधातुकं शेषः"[24] इत्यनेन आर्धधातुकसंज्ञकत्वात् "बृंहेरच्यनिटि" इति वार्तिकेन आर्धधातुकनिमित्तके नकारलोपे उप बृह्+अन (ल्युट्) इत्यत्र "पुगन्तलघूपधस्य च" इति सूत्रेण प्राप्तस्य लघूपधगुणस्य प्रकृतसूत्रेण निषेधो स्यादिति वाच्यम्, 'उपबर्हणम्' इत्यत्र बृह्-धातोः सत्त्वात्। महाभाष्ये यथा- बृहिः प्रकृत्यन्तरम्। धातुपाठे बृंह्-धातुना सह बृह्-धातोरपि पठितो वर्तते। अत्र



अन्यदपि प्रमाणं महाभाष्ये एवम्प्रकारेण उल्लिखितमस्ति, यथा- कथं ज्ञायते बृहिः प्रकृत्यन्तरमिति? बृंहेरच्यनिटि (वा.) इत्यत्र अचीति हि लोप उच्यते। अनजादावपि दृश्यते- निबृह्यते। अनिटीति चोच्यते। इडादावपि दृश्यते- निबर्हिता निबर्हितुम् इति। अजादावपि न दृश्यते- बृंहयति। बृंहकः।[25] तस्माद् उपर्युक्तप्रकारेण परिगणनं न करणीयम्।

न च उपर्युक्तप्रकारेण परिगणनाभावे अत्र प्राप्नोति- भेद्यते, छेद्यते। भेद्यते, छेद्यते इत्यत्र क्रमशः (भिद्+णिच्[26]+यक्[27]+त), (छिद्+णिच्+यक्+त) इत्यवस्थायां य (यक्) आर्धधातुकसंज्ञकप्रत्ययनिमित्त- कधात्वंशलोपे "पुगन्तलघूपधस्य च" इति सूत्रेण प्राप्तस्य लघूपधगुणस्य प्रकृतसूत्रेण निषेधो स्यादिति वाच्यम्, धातुलोपे इत्यत्र धातोर्लोपो यस्मिन् तदिदं धातुलोपम्, तस्मिन् धातुलोपे। एवम्प्रकारेण बहुव्रीहि-समासमाध्यमेन "न धातुलोप आर्धधातुके" सूत्रस्य 'यस्मिन्नार्द्धधातुके धातोरवयवस्य लोपो भवति, तस्मिन्नेवार्द्धधातुके प्रत्यये इकः स्थाने ये गुणवृद्धी प्राप्नुतस्ते न भवतः' इत्यर्थस्य सत्त्वात्। भेद्यते, छेद्यते इत्यत्र क्रमशः (भिद्+णिच्+यक्+त), (छिद्+णिच्+यक्+त) इत्यवस्थायां धात्वंशलोपस्य निमित्तो विद्यते आर्धधातुकसंज्ञको यक्-प्रत्ययः तथा च लघूपधगुणस्य निमित्तो विद्यते आर्धधातुकसंज्ञकः इ (णिच्) प्रत्ययः।

न च यदि इग्लक्षणयोर्गुणवृद्ध्योः प्रकृतसूत्रेण प्रतिषेधो भवति, तर्हि पापचकः, पापठकः, मगधकः, दृषदकः इत्यत्र पापच्य+अक (ण्वुल्), पापठ्य+अक (ण्वुल्), मगध्य+अक (ण्वुल्), दृषद्य+अक (ण्वुल्) इत्यवस्थायां यकाराकारयोर्लोपानन्तरं "अत उपधायाः" इत्यनेन उपधा-वृद्धिः प्राप्नोतीति वाच्यम्, "अचः परस्मिन् पूर्वविधौ"[28] इति सूत्रेण अल्लोपस्य (अकारस्य) स्थानिवत्वात्।

प्रकृतसूत्रस्य अनावश्यकत्वप्रतिपादनम्- यद्यपि "न धातुलोप आर्धधातुके" सूत्रस्य 'यस्मिन्नार्द्धधातुके धातोरवयवस्य लोपो भवति,

Scanned with CamScanner

तस्मिन्नेवार्द्धधातुके प्रत्यये इकः स्थाने ये गुणवृद्धी प्राप्नुतस्ते न भवतः' इति निष्कृष्टार्थद्वारा उपर्युक्तानां समेषां रूपाणां सिद्धिर्भवति, तथापि महाभाष्यदृष्ट्या सूत्राऽभावेऽपि सूत्रसम्बद्धानां सर्वेषां रूपाणां सिद्धिर्भवितुं शक्नोति। यथा- बेभिदिता, मरीमृजकः, कुषुभिता, मगधकः, समिधिता इत्यत्र स्थलेषु यकाराकारयोर्लोपानन्तरं अल्लोपस्य (अकारस्य) "अचः परस्मिन् पूर्वविधौ" इति सूत्रेण स्थानिवत्वाद् यथायथं प्राप्ते गुणवृद्धी न भविष्यतः। यत्र य-रूपस्य (यङ्) हलचोः समुदायस्य स्थाने "यङोऽचि च" इति सूत्रेण लुक् आदेशो प्राप्नोति, तत्रापि पूर्वं "अतो लोपः" इत्यनेन अकारलोपः पश्चात् "यङोऽचि च" इति सूत्रेण यकारलोपो (य्) भवति। न च "यङोऽचि च" इति सूत्रेण पूर्वं लुकि कृते स्थानिवद्भावस्य प्राप्तिरेव नास्तीति वाच्यम्, "यस्य हलः" सूत्रस्य योगविभागद्वारा पूर्वं अकारलोपस्य अनन्तरं यकारलोपस्य (य्) सत्वात्। महाभाष्ये यथा- अल्लोपे योगविभागः करिष्यते। अतो लोपः। ततो यस्य। यस्य च लोपो भवति। अत इत्येव। किमर्थमिदम्। लुकं वक्ष्यति तद्बाधनार्थम्। ततो हलः। हल उत्तरस्य यस्य च लोपो भवति।[29] अर्थात् "अतो लोपः", "यस्य हलः" इत्यनयोः सूत्रयोर्मध्ये "यस्य हलः" अस्य योगस्य विभागः क्रियते। "यस्य", "हलः"। "यस्य" अत्र सूत्रे "अतो लोपः" इत्यतः 'अतः' इत्यस्य अनुवृत्तिरागच्छति। इदानीं "यस्य" सूत्रस्य अर्थः- यकाराऽकारस्य (य=य्+अ) लोपो भवेत्, आर्धधातुके प्रत्यये। अनन्तरं "हलः"। अत्र सूत्रे "यस्य" सूत्रस्य अनुवृत्तिरागच्छति। अस्य अर्थो यथा- हलः यकारस्य (य्) लोपो भवेत्। "यस्य" इति विभाजितं द्वितीयं सूत्रं "यङोऽचि च" इति सूत्रेण प्राप्तस्य यङ्लुकः बाधनाय विद्यते।

न च यदि पूर्वोक्तप्रकारेण परत्वात् अथवा योगविभागात् कृष्णो नोनाव वृषभो यदीदम्। (ऋ.- १/७९/२) इति मन्त्रे 'नोनाव' इत्यत्र 'नोनूय+अ (णल्)' इति दशायां पूर्वं अकारलोपः अनन्तरं यकारलोपः (य्) क्रियते, तर्हि अत्रापि अकारस्य स्थानिवद्भावेन 'नोनू+अ (णल्)' इति स्थितौ अजन्ताङ्गे 'नोनू' इत्यत्र "अचो ञ्णिति"[30] इति सूत्रेण कथं ऊकारस्य स्थाने वृद्धिः अनन्तरम् 'अव्' आदेशो भवतीति वाच्यम्, लिट्-प्रत्ययोत्पत्तेः प्रागेव सूत्रे चकारग्रहणात् "यङोऽचि च" इति सूत्रेण 'नोनूय+अ (णल्)' इति दशायां हलचोः समुदायस्य यकारस्य (यङः) लुक्त्वात्। स्यदादीनां सिद्धिर्तु निपातनात् भवतीति पूर्वमेव उक्तमस्ति।



न च 'निकुचितः' इत्यत्र 'नि कुञ्च्+इ (इट्) त (क्त)' इति स्थितौ "अनिदितां हल उपधायाः क्ङिति" इति सूत्रेण आर्धधातुकसंज्ञके 'इ त' प्रत्यये परे उपधा-नकार-लोपे 'उदुपधाद् धातोः परः भावे आदिकर्मणि च वर्तमानः सेट् निष्ठा-प्रत्ययः विकल्पेन कित् न स्यात्' इत्यर्थकेन "उदुपधाद्भावादिकर्मणोरन्यतरस्याम"[31] इति सूत्रेण कित्त्वनिषेधे सति "पुगन्तलघूपधस्य च" इति सूत्रेण लघूपधगुणः कथं न स्यादिति वाच्यम्, "सन्निपातलक्षणो विधिरनित्यं तद्विघातस्य" (यन्निमित्तं मत्वा यत् कार्यं समुत्पद्यते, तत् कार्यं स्वनिमित्तस्य विनाशे साधको न भवति।) इति परिभाषया 'कुञ्च्' धातौ उकारस्य उपधात्व-सम्पादने निमित्तभूतस्य 'इ त' सेट्-निष्ठा-प्रत्ययस्य कित्वनिषेधे 'कुञ्च्' धातोः उकारस्य साधकत्वाभावात्।

निष्कर्षः- महाभाष्ये उपर्युक्तप्रकारेण अस्य सूत्रस्योपरि गहनचिन्तनद्वारा दृष्टप्रयोजनदृष्ट्या यद्यपि "न धातुलोप आर्धधातुके" सूत्रस्य महाभाष्यकारेण पतञ्जलिना अनावश्यकत्वं प्रतिपादितं विद्यते, तथापि 'सामर्थ्ययोगान्नहि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्' इति "इको यणचि"[32] सूत्रस्थभाष्यात् तथा 'वर्णेनाप्यनर्थकेन न भवितव्यम्' इति "वृद्धिरादैच्"[33] सूत्रस्थभाष्यात् पुण्य- जनकत्वरूपाऽदृष्ट- प्रयोजनदृष्ट्या सूत्रमिदं सर्वथोपयोगित्वमाहति।

सन्दर्भाः-

1. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 1/1/3
2. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 7/4/90
3. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 2/4/74
4. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 1/3/1
5. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 7/3/84
6. यङ्लुगन्त-धातुः।
7. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 6/4/24
8. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 6/1/87
9. लोपो व्योर्वलि- ६/१/६६
10. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 3/4/33
11. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 1/1/54
12. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 6/4/49
13. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 6/4/48
14. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 7/2/116
15. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 6/4/33
16. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 6/4/27
17. महाभाष्योपरि चारुदेव शास्त्री-महोदयेन लिखितायां हिन्दीटीकायां पृष्ठ-संख्या 176
18. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 7/3/86
19. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 6/4/28
20. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 6/4/29
21. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 6/1/16
22. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 6/1/108
23. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 8/2/77



24. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 3/4/114
25. महाभाष्योपरि चारुदेव शास्त्री-महोदयेन लिखितायां हिन्दीटीकायां पृष्ठ-संख्या-179/180
26. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 6/4/51
27. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 3/1/67
28. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 1/1/47
29. महाभाष्योपरि चारुदेव शास्त्री-महोदयेन लिखितायां हिन्दीटीकायां पृष्ठ-संख्या-183
30. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 7/2/115
31. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 1/2/21
32. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 6/1/742. पाणिनीय-अष्टाध्यायी-सूत्रपाठः-7/4/90
33. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 1/1/1

Scanned with CamScanner

# कर्मकाण्डसंस्कारविज्ञानम्





प्रधानसम्पादकः
प्रो. अर्कनाथचौधरी

सम्पादकः
डॉ. शत्रुघ्नपाणिग्राही

सहसम्पादकः
डॉ. अश्विन का. राजगोरः

Scanned with CamScanner

# कर्मकाण्डसंस्कारविज्ञानम्

(महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, श्रीसोमनाथसंस्कृतियुनिवर्सिटी, तथा सन्तश्री सन्ध्यागिरिबापुसंस्कृतवेदविद्यालयः, इत्येषां संयुक्ततत्त्वावधाने समायोजिता त्रिदिवसीया अखिलभारतीयवेदसङ्गोष्ठ्यां प्रस्तुतशोधपत्राणां संग्रहः)

**आयोजकसंस्था:**

महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
सन्तश्री सन्ध्यागिरिबापुसंस्कृतविद्यालयः

**संरक्षकाः**

पू. सन्तश्रीभगवद्गिरी बापु
प्रो. अर्कनाथचौधरी
प्रो. विरूपाक्षजडिपालः

**प्रकाशकः**

डॉ. महेन्द्रकुमार अं. दवे
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवन रोड, वेरावलम्–३६२ २६६.

ISBN : 978-93-83097-23-4

प्रतिलिपयः – ५००
प्रकाशनवर्ष–२०१७
प्राप्तिस्थानम् – सन्तश्री सन्ध्यागिरिबापुसंस्कृतवेदविद्यालयः,
सामख्याली, कच्छ, गुजरातम् तथा
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, राजेन्द्रभुवन रोड, वेरावलम्–३६२ २६६.

**मुद्रणम्:**

**जलाराम ग्राफीक्स अेन्ड ओफसेट**
**परमहंस अेपार्टमेन्ट के पास, होटल कावेरी के पीछे,**
**अेस टी रोड, वेरावल - ३६२ २६६.**
**फोन : (०२८७६) २२१८६१**

Scanned with CamScanner

# अनुक्रमणिका


| क्रमांक: | विषय: | नाम | पृष्ठ: |
|---|---|---|---|
| १. | सम्पादकीयम् | डॉ. शत्रुघ्नपाणिग्राही | iii |
| २. | प्रास्ताविकम् | डॉ. अश्विन का. राजगोर: | iv |
| ३. | परम पूज्य ब्रह्मलीन संत श्री १०८ श्री संध्यागिरिबापु का जीवन चरित्र | भगतत्सेवक भगवतिगिरिबापु | v-vi |
| ४. | गिरनारी आश्रम | डॉ. अश्विन का. राजगोर: | vii |
| ५ | संस्था के उद्देश्य और प्रवृत्ति | श्री विपुलभाई शास्त्री | viii |
| ६ | पारदेश्वर अर्थात् पारे का शिवलिंग का माहात्म्य | श्री रमेशभाई के. जोषी | ix |
| ७. | वैदिकविज्ञान के अर्थचिन्तन में उपयोगी कतिपय पारिभाषिकपदों का विवेचन | प्रो. अर्कनाथ चौधरी | १-३ |
| ८. | उपनयन संस्कार की वर्तमान समय में उपयोगिता | प्रो. कमलेशकुमार छ. चोकसी | ४-७ |
| ९. | कठोपनिषदि मानवीयजीवनमूल्यसंस्कारमीमांसा | प्रो. जयप्रकाशनारायणद्विवेदी | ८-१२ |
| १०. | सामाजिकजीवने उपनयनसंस्कारस्यावश्यकता | डॉ. महेन्द्रकुमार अं. दवे | १३-१७ |
| ११. | व्याकरणशास्त्रदृष्ट्या 'गो' शब्दविमर्श: | प्रो. विनोद कुमार झा | १८-२४ |
| १२. | सन्ध्यावन्दनमहत्त्वम् | डॉ. नरेन्द्रकुमार पण्डया | २५-२७ |
| १३. | संस्काराणामाधुनिकयुगे महत्त्वम् | प्रो. अर्चना दुबे | २८-३५ |
| १४. | गोत्वं तस्या: यज्ञे योगदानम् | डॉ. कृष्णप्रसाद निरौला | ३६-३७ |
| १५. | ब्राह्मसंस्कारवैशिष्ट्यं स्मृतिशास्त्रे प्रकीर्त्तितम् | प्रो. कमलेशमिश्र: | ३८-४१ |
| १६. | भावो हि विद्यते देव: | डॉ. रामराज उपाध्याय | ४२-४५ |
| १७. | वेदे स्मृतौ च गोर्महत्त्वम् | आचार्यश्रीरवीन्द्रनाथभट्टाचार्य: | ४६-५० |
| १८. | गोतत्त्वदर्शनम् | डॉ. विश्वनाथस्वाइ | ५१-५३ |
| १९. | श्रुतिस्मृतिपुराणादिषु गोर्महत्त्वम् | प्रो. महेन्द्र पाण्डेय | ५४-५६ |
| २०. | कर्मकाण्डमहिमा | डॉ. अमृतलाल: भोगयता | ५७-५८ |
| २१. | साम्प्रतं सन्ध्योपासनस्यौचित्यम् | डॉ. रामानुज उपाध्याय | ५९-६१ |
| २२. | अग्निहोत्र यज्ञ: एक सुपरीक्षित वैज्ञानिक प्रक्रिया | डॉ. भावप्रकाश एम. गांधी | ६२-६५ |
| २३. | वेदप्रणीतगृहस्थाश्रमसिद्धान्ता: | राजगोर रविशंङ्कर: कुम्भाभाई | ६६-६९ |
| २४. | सामाजिकजीवने उपनयनसंस्कारस्यावश्यकता | डॉ. महेन्द्रकुमार अं. दवे | ७०-७२ |
| २५. | वेदेषु शास्त्रेषु च गो: महिमा | डॉ. ललितपटेल: | ७३-७५ |
| २६. | धेनोर्महत्त्वम् | डॉ. डायालाल मा. मोकरिया | ७६-७८ |
| २७. | वेदेषु गोतत्त्वम् | डॉ. शत्रुघ्नपाणिग्राही | ७९-८२ |


Scanned with CamScanner

# व्याकरणशास्त्रदृष्ट्या 'गो' शब्दविमर्शः

प्रो. विनोद कुमार झा

**'गो' शब्दस्य सिद्धिप्रक्रिया प्रसिद्धार्थाश्च** – 'गो' शब्दस्य पुँल्लिङ्गे स्त्रीलिङ्गे च प्रयोगो भवति । गच्छतीति गौः अर्थात् गमनशीलः/गमनशीला, अत्र 'गम्' धातोः कर्तरि अर्थे **'गमेर्डोः'**[1] इति सूत्रेण डॉ प्रत्यये तत्र अनुबन्धलोपे, डित्त्वसामर्थ्याद् अभस्यापि ओभागस्य **'टे'**[2] सूत्रेण लोपे सति 'गो' शब्दस्य सिद्धिर्भवति । अथवा गच्छति अनेन इति गौः, एवम्प्रकारेण करणेऽर्थेऽपि **'गमेर्डोः'** इति सूत्रेण 'डो' प्रत्ययस्य विधानद्वारा 'गो' शब्दस्य सिद्धिर्भवितुं शक्नोति । वृषस्य यानसाधनत्वात् स्त्रीगव्या दानेन स्वर्गगमनसाधनत्वाच्च उभयोरपि दानेन स्वर्गगमनत्वाद्वा 'गो' शब्दे साधनत्वमस्ति । वस्तुतस्त्वयं रूढ एव शब्दः यथोक्तमपि– **'रूढा गवादयः प्रोक्ता यौगिका पाचकादयः । योगरूढाश्च विज्ञेयाः पङ्कजाद्या मनीषिभिः ।।** उपर्युक्तव्युत्पत्तिद्वारा 'गो' शब्दस्य अर्थो भवति– पशुविशेषः, यः लोके गोरु, गाय प्रभृतिशब्दैर्बोध्यते ।

**'गो' शब्दस्य अन्य अर्थाः**– गच्छति=प्राप्नोति विश्वं प्रकाशकात्मकेन स्वतेजसा अथवा जानाति सर्वम् इति व्युत्पत्या सूर्यः, गोमेधयज्ञः, ऋषभनाभौधिः, जलम् इत्येते अर्थाः गोशब्दार्थत्वेन सन्ति । जल–शब्दः मेदिनीकोषानुसारं बहुवचने तथा भरतानुसारं एकवचनेऽपि प्रयुज्यते । यथा– स्वमिव भुज गवि शेष व्युपधाय स्वपिति यो भुजङ्गविशेषम् । नवपुष्करसमकरया श्रियोर्मिपङ्क्त्या च सेवितः समकरया..... (वृन्धावनयमके–२) । माता, शुकदौहित्रस्य ब्रह्मदत्तस्य भार्या, स कीर्त्यां शुककन्यायां ब्रह्मदत्तमजीजनत् । स योगी गवि भार्यायां विष्वक्सेनमधात् सुतम् ।[3] 'गवि सरस्वत्यां भार्यायाम्' इति कश्चिद् व्याचष्टे । गच्छति शीघ्रमिति व्यत्पत्या कर्तरि अर्थे डो–प्रत्ययेन गो–शब्दार्थः बाणः भवति । 'गच्छति निम्नदेशमिति व्युत्पत्त्या कर्तरि अर्थे डो–प्रत्ययेन जलम्, भूमिः, पशुविशेषः इत्येते गो–शब्दार्थाः दीयन्ते । गम्यते=जायते स्पर्शसुखमनेनेति व्युत्पत्त्या गो–शब्दार्थः नपुंसकलिङ्गकः लोमं भवति (त्वचि जातत्वादेवास्य तथात्वम्) । 'गम्यते=ज्ञायते चिताभिप्रायो यया' इति व्युत्पत्त्या करणेऽर्थे 'डो' प्रत्ययविधानद्वारा 'गो' शब्दस्य 'वाक्' अर्थो भवति । 'गम्यते=ज्ञायते विषयज्ञानं यया' इति व्युत्पत्त्या करणेऽर्थे 'डो' प्रत्ययविधानद्वारा 'गो' शब्दस्य चक्षुः, रश्मिः, स्वर्गः, व्रजः, वाक् इत्येतेऽपि अर्थाः भवन्ति । 'गम्यन्ते=जायन्ते विषया येन' यद्वा 'गच्छति शीघ्रमि' 'ति' व्युत्पत्द्विारा कर्तरि करणे वा 'डो' प्रत्ययेन 'गो' शब्दस्य रश्मिः अर्थो भवति, किरणसम्पर्कं विना चाक्षुषज्ञानाभावात् किरणस्य ज्ञानप्रकाशधर्मवत्वात् शीघ्रगामित्वाच्च । अत्र प्रमाणम्– त्रयोदशद्वीपवर्ती गोभिर्भासयते महीम् । त्रयाणामपि लोकानां हितायैकः प्रवर्तसे ।[4] 'गो' शब्दस्य एकोऽर्थः भूमिरपि वर्तते, यथा– 'दुदोह गां स यज्ञाय सस्याय मघवा दिवम् । सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ।'[5] वृषोऽपि 'गो' शब्दस्य अर्थो विद्यते, यस्य प्रयोगः कुँल्लिङ्गे क्रियते । पुँल्लिङ्गस्य 'गो' शब्दस्य 'गम्यते कर्मिभिः= यज्ञदानपरोपकारादिधर्ममूलककर्मफलैः अथवा इष्टपूर्तादिसकामकर्मभिर्यस्मिन् इति व्युत्पत्त्या अधिकरणेऽर्थे 'डो' प्रत्ययविधानद्वारा स्वर्गः, चन्द्रः (पुण्यवता चन्द्रलोकगमनात्) अर्थो भवति । एतदतिरिक्तं स्त्रीलिङ्गे प्रयोज्या एतेऽपि गो–शब्दार्थाः सन्ति– माहेयी, सौरभेयी, उस्रा, माता, शृङ्गिनी, अर्जुनी, अघ्न्या, रोहिणी, माहेन्द्री, इज्या, धेनुः अघ्ना, दोग्ध्री, भद्रा, भूरिमही, अनडुही, कल्याणी, पावनी, गौरी, सुरभि, महा, निलिनाचिः, सुरमी, अनड्वाही, द्विडा, अधमा, बहुला, मही, सरस्वती, उस्त्रिया, अही, अदितिः, इला, जगती, शर्करी । यथा उक्तमपि– पराशरः प्राह बृहद्रथाय गोलक्षणां यत्क्रियते ततोऽयम् । मया समास शुभलक्षणास्ताः सर्वास्तथाप्यगमतोऽभिधास्ये....।[6]

**समस्ताः कृदन्ताः तद्धितान्ताश्च केचन गो–शब्दाः–**

गोकर्णः, गोकुलम्, गोक्षुरः, गोत्रः, गोत्रम्, गोत्रभित्, गोत्रा, गोदा, गोदारणम्, गोदावरी, गोधनम्, गोधा, गोनसः, गोनासः, गोपतिः, गोपानसी, गोपालः, गोपुच्छः, गोपुरम्, गोप्यः, गोमतल्लिका, गोमयम्, गोमान्, गोमायुः, गोमी, गोमुखम्, गोयुगम्, गोलाङ्गूलः, गोविन्दः, गोवृन्दम्, गोष्ठम्, गोष्ठश्वः, गोसम्भवम्, गोसर्गः, गोस्तना, गोस्तनी, गोस्वामी इत्येते केचन समस्ताः कृदन्ताः तद्धितान्ताश्च गो–शब्दाः सन्ति, येषां विस्तृतं वर्णनमत्र शोध–पत्रे क्रमात् प्रस्तूयते । यथा–



Scanned with CamScanner

ससमस्ताः कृदन्ताश्च केचन गो-शब्दाः-

**गोकर्णः** (गोः कर्ण इव)- शब्दोऽयं पुँल्लिङ्गे प्रयुज्यते । अस्याऽर्थो विद्यते- परिमाणविशेषः, अनामिकायुक्तविस्तृताङ्गुष्ठम्, वितस्तिः । 'गोः' कर्णाविव कर्णौ यस्य (बहुव्रीहि-समासः) 'इत्यनुसारम् अस्याऽर्थो विद्यते- मृगभेदः, गणदेवताविशेषः, तीर्थविशेषः, पीठस्थानम् । 'गौः=चक्षुरेव कर्णौ यस्य (बहुव्रीहि-समासः)' इत्यनुसारम् गोकर्णस्य अर्थो विद्यते- सर्पभेदः ।

**गोकुलम्** (गवां कुलम्)- नपुंसकलिङ्गे शब्दोऽयं प्रयुज्यते । गोसमूहः, गोधनम्, गवां व्रजः, गोस्थानम्, मथुरैकदेशे श्रीनन्दस्य वासस्थानम् पण्डितविशेषः[७] चेत्येते गोकुल-शब्दार्थाः सन्ति । गोकुलमित्यत्र षष्ठी-तत्पुरुषसमासो वर्तते ।

**गोक्षुरः**- क्षुरति=विलिखति इति क्षुरः । इगुपधाद् विलेखनार्थकात् क्षुर्-धातोः कर्तरि अर्थे 'क' प्रत्यये, तत्र अनुबन्धलोपे, तस्य आर्धधातुकसंज्ञायाम्, **"पुगन्तलघपधस्य च"**[८] इति सूत्रेण लघुपधगुणस्य प्राप्तिः तथा **"विङति च"**[९] इति सूत्रेण तन्निषेधः । 'गोः'=पृथिव्याः क्षुरः=अश्वविशेष इव इति गोक्षुरः (षष्ठीतत्पुरुषसमासः) । अस्य शब्दस्य अर्थाः विद्यन्ते- क्षुद्रक्षुपविशेषः, त्रिकण्टकः, स्थलशृङ्गाटः, गोकण्टः, त्रिकण्टकः, त्रिपुटः, कण्ठकफलः, क्षुरः, गोक्षुरकः, पलङ्कषा, इक्षुगन्धा, श्वदंष्ट्रा, स्वादुकण्टकः, गोकण्टकः, वनशृङ्गाटः, क्षुरकः, भक्ष्यकण्टः, इक्षुगन्धिका, क्षुरङ्गः, श्वडंष्ट्रकः :, कण्टकी, भद्रकण्टः, व्यालदंष्ट्रः, षडङ्गः, गोखुरः, त्रिकटः, त्रिकः, इक्षुरः । **'गोत्रः'** पुँल्लिङ्गे प्रयुज्यमानः शब्दोऽयं गो कर्मण्युपपदे रक्षणार्थके त्रैङ्-धातौ अनुबन्धलोपे, आदेच "उपदेशेऽशिति"[१०] इति सूत्रेण आत्वे, आतोऽनुपसर्गे कः[११] इति सूत्रेण कर्त्रर्थे 'क' प्रत्यये, तत्रानुबन्धलोपे, अकारस्य आर्धधातुकसंज्ञायाम्, **'आतो लोप इटि च'**[१२] इति सूत्रेण आकारलोपे निष्पद्यते । अस्य व्युत्पत्तिरेवम्प्रकारेण विद्यते- गां=पृथिवीं त्रायते=रक्षति इति गोत्रः । अस्यार्थो विद्यते पर्वतः , यथा-नाड्यो नदनदीनान्तु गोत्राणामस्थिसंहतिः।[१३]

**गोत्रम्**- नपुंसकलिङ्गे प्रयुज्यमानस्य शब्दस्याऽस्य अर्थो विद्यते- सन्ततिः, जननं, कुलम्, अभिजनः, अन्वयः, वंशः, अन्ववायः, सन्तानः । आख्या, नाम यथा- 'स्मरसि स्मरमेखलागुणैरुत गोत्रस्खलितेषु बन्धनम्' ।[१४] सम्भावनीयबोधः, काननम्, क्षेत्रम्, वर्त्म, छत्रं, सङ्घः, वृद्धिः, वित्तम्, मेघः । यथा- 'त्वं गोत्रमङ्गिरोभ्योऽवृणोरपोतात्रये शतदूरेषु गातुवित् ।'[१५] अस्य व्युत्पत्तिर्विद्यते-गवते=शब्दायति पूर्वपुरुषान् यत् तद् गोत्रम् ।

**गोत्रभित्**- गोत्रं=पर्वतं भिनति इति गोत्रभित् । अत्र भिद्-धातोः **'सत्सूद्विष.....मुपसर्गेऽपि क्विप्'**[१६] इति सूत्रेण कर्तरि अर्थे क्विँप्-प्रत्यये, क्विँप्-प्रत्ययस्य सर्वापहारिलोपे, तुगागमे, उपपदसमासे सति निष्पन्नो भवति शब्दोऽयम् । अस्यार्थो वर्तते- इन्द्रः, यथा- 'यो गोत्रभिद्वज्रभृद्यो हरिष्ठाः स इन्द्र चित्राँ अभितृण्धि वाजान् ।[१७] सहासनं गोत्रभिदाध्यवात्सीत् ।'[१८]

**गोत्रा**- स्त्रीलिङ्गशब्दोऽयं 'गाः=पशून्, सर्वान् जीवान् त्रायते इति गोत्रा (गो+त्रै+क+टाप्)[१९] इति व्युत्पत्त्या पृथिवीवाचको विद्यते । 'गवां समूहरिति गोत्रा स्त्रीलिङ्गे (गो+त्र[२०]+टाप)' इति व्युत्पत्या गोसमूहवाचकः गायत्री-स्वरूपा-महादेवीवाचको वाऽयं शब्दो विद्यते, यथा- 'गन्धर्वी गह्वरी गोत्रा गिरिशा गहना गमी ।'[२१]

**गोदा**- 'गां=जलं स्वर्गं वा ददाति स्नानेनेति गोदा (गो+दा+क+टाप्)' । स्त्रीलिङ्गस्य अस्य शब्द य अर्थो विद्यते- गोदावरी नदी, गायत्री-स्वरूपा-महादेवी, यथा- 'गर्वापहारिणी गोदा गोकुलस्था गदाधरा ।'[२२] 'गाः ददाति इति गोदा (गो+दा+क्विँप्+टाप्)' अस्याः अर्थोऽस्ति- गोदाता (त्रि.), यथा- गोदा इन्द्रेवतो मदः ।२३

**गोदारणम्**- नपुंसकलिङ्गे प्रयुज्यमानस्य शब्दस्याऽस्य अर्थो विद्यते- कुद्दालः, लाङ्गलम् । अस्य व्युत्पत्तिर्वर्तते- गौः=भूमिः दार्यतेऽनेनेति (गो+दॄ+णिच्+करणे ल्युट्)[२४] ।



Scanned with CamScanner

**गोदावरी-** 'गां=जलं स्वर्गं वा ददातीति गोदाः, तासु वरी श्रेष्ठा इति गोदावरी (गोदा+वर+ङीप् संज्ञायाम्)' । 'गां=स्वर्गं ददातीति गोदाः, (गो+दा+वनिप्+ङीप् रान्तादेशश्च)' । अस्यार्थः- नदीविशेषः, गोदा, गौतमसम्भवाः, ब्रह्माद्रिजाताः गौतमी । यथा- 'विप्रो रोषेण तत्याज तं च पुत्रं स्वकामिनीम् । सरिद् बभूव योगेन सा च गोदावरी स्मृता ।' (ब्रह्मवैवर्ते) पुनश्च 'गोदावर्यां त्रिसन्ध्या तु गङ्गाद्वारे रतिप्रिया ।'[२५]

**गोधनम्-** गोधन-शब्दस्य नपुंसकलिङ्गे प्रयोगो भवति । अस्य अर्थो विद्यते- गवां धनं समूहः अर्थात् गोसमूहः । रामायणे यथा- 'स आत्मनो दृढां कक्षा बद्ध्वा सम्भ्रान्तमानसः । दण्डमुद्यम्य सहसा प्रतस्थे गोधनं प्रति ।'[२६]

**गोधा-** गुध्यते=परिवेष्ट्यते बाहुर्यया इति गोधा (गुध्+करणे घञ्)[२७] अर्थो यथा- जन्तुविशेषः, निहाका, गोधिका, दारुमुख्याह्वा, भाषायां तु गोहः । चरके यथा- 'गोधा विपाके मधुरा कषायकटुका रसे । वातपित्तप्रशमनी बृंहणी बलवर्द्धनी ।'

**गोनसः-** पुँल्लिङ्गस्य गोनस-शब्दस्य गोरिव नासिका यस्य इति व्युत्पत्त्या अर्थो भवति- सर्पविशेषः, तिलित्सः, गोनासः, घोनसः, मण्डलीवोड्रः, वोड्रः । सुश्रुते यथा- मिलिन्दको गोनसो वृद्धगोनसः पनसी । गोनसशब्दे **'अञ् नासिकायाः संज्ञायां नसं चास्थूलात्'**[२८] इति सूत्रेण समासान्तः अच्-प्रत्ययः तथा च नासिका-शब्दस्य स्थाने नसादेशो भवति ।

**गोनासः-** पुँल्लिङ्गस्य गोनास-शब्दस्य 'गोर्नासा इव नासा यस्य' इति व्युत्पत्त्या अर्थो भवति- गोनससर्पः ।

**गोपतिः-** पुँल्लिङ्गस्य गोपति-शब्दस्य 'गवां=रश्मीनां पतिरिति' व्युत्पत्त्या अर्थो भवति- सूर्यः । यथा- 'परिभ्रमन्तमुल्काभां भ्रामयन्तं गदा मुहुः । अस्त्रतेजः स्वगदया नीहारमिव गोपतिः । 'गोः'=वृषभस्य पतिः अथवा गवां=पशूनां जीवानां पतिरिति व्युत्पत्त्या अर्थो भवति- महादेवः, शिवः रुद्रः । महाभारते यथा- गोपालिर्गोपतिर्ग्रामो गोचर्मवसनो हरिः । गां=पृथ्वी=जगत् पाति=पालयति (गो+पा+डति) इति व्युत्पत्त्या अस्य अर्थो भवति- विष्णुः । महाभारते[२९] यथा- 'उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः । 'गोः=पृथिव्याः पतिः (गो+पा+डति)' इति व्युत्पत्त्या गोपति-शब्दस्य अर्थो भवति- राजा । गवां=सौरभेयीणां पतिः इति व्युत्पत्त्या अस्य अर्थो भवति- वृषः ।

**गोपानसी-** (स्त्री.) 'गोपायति=रक्षति गृहमिति व्युत्पत्त्या गोपानसी-शब्दस्य अर्थो भवति- गृहाणामग्रभागे दत्तवक्रकाष्ठम्, वलभी, वडमी, गृहचूडा, वडभी । गोपानसी-शब्दे गुपू (रक्षणे) धातोः बाहुलकाद् नसट्प्रत्ययः, यलोपः ततो ङीप् च भवति। माघे यथा- गोपानसीषु क्षणमास्थितानामालम्बिभिश्चन्द्रकिणांक लापैः । हरिन्मणिश्यामतृणाभिरामैर्गृहाणि नीध्रैरिव यत्र रेजुः ।।[३०]

**गोपालः-** (पु.) गाः पालयति (गो+पाल्+कर्मण्यण् इति अण्) अथवा गवां पालकः इत्यनुसारं गोपालशब्दस्य अर्थो भवति- वृन्दावनस्थगोपालनांस्वरूपम्।पद्मपुराणेयथा-**गोपाला मुनयःसर्वे वैकुण्ठानन्दमूर्तयः।** गां=पृथिवीं वेदं वा पालयति (गो+पाल्+अण्) इति व्युत्पत्त्यनुसारं अस्य अर्थो लभ्यते- नन्दनन्दनः, कृष्णः । पद्मपुराणे यथा- **गोवर्द्धनं तथापश्यं कृष्णवामकरोद्धृतम् । महेन्द्रदर्पनाशाय गोगोपालसुखावहम् । दृष्ट्वा विहृष्टो ह्यभव सर्वभूषणभूषणम् । गोपालमवलासङ्गमुदितं वेणुनादितम् ।**

**गोपुच्छः** (पु.) **गोः पुच्छ इव आकृतिर्यस्य** इत्यनुसारं गोपुच्छ-शब्दस्य अर्थो भवति- हारभेदः, वाद्यविशेषः, गोलाङ्गूलवानरः[३१] गवां लाङ्गूलम् (क्ली.)[३२] ।

**गोपुरम्- (क्ली.) गोपायति=नगरं रक्षति** इत्यनुसारं गोपुरस्य अर्थो भवति- नगरद्वारम्, पुरद्वारम्, दुर्गपुरद्वारम्, द्वारमात्रम् । गोपुर-शब्दे **गुप्+बाहुलकाद् उरच्,** अथवा **गाः पिपर्ति** इत्यनुसारं **पृ (पालनपूरणयोः)+क**[३३] प्रत्ययो विद्यते । अथवा गौः=जलं पुरं वा अस्य अथवा गवा=जलेन पिपर्ति=पूरयति आत्मानम् (पृ+क) इत्यनुसारम् अस्यार्थो भवति- कैवर्तीमुस्तकम्, वैद्यकशास्त्रप्रणेतृऋषिभेदः ।



Scanned with CamScanner

**गोप्यः**- (पु.) गोप्यते=रक्ष्यते असौ इति गोप्यः इत्यनुसारम् अस्य शब्दस्य अर्थो विद्यते-दासीपुत्रः, दासः । अत्र गोप्य-शब्दे 'गुपू (रक्षणे)+ण्यत्'[३४] वर्तते । यथा- सहदेवं समीपस्थं नित्यमेव समादिशत् । तेन गोप्यो हि नृपतिः सर्वावस्थो विशाम्पते ।[३५] गोप्यते असाविति गोप्यः इत्यत्र गुप्-धातोः कर्मण्यर्थे ण्यत्-प्रत्यये सति सम्पद्यमानस्य गोप्य-शब्दस्य अर्थो भवति- गोपनीयः।

**गोमतल्लिका- (स्त्री.)** प्रशस्ता गौः=गोजातिरिति गोमतल्लिका अर्थात् सुशीला गौः । अत्र **'प्रशंसावचनैश्च'**[३६] इत्यनेन नित्यसमासेन सह परनिपातो भवति ।

**गोमुखम्- (क्ली.)** गोर्मुखमिव मुखं प्रवेशद्वारमस्य इति गोमुखम् । अस्यार्थः- लेपनम्, वाद्यभाण्डम्, सेंध इति भाषायाम्, आसनविशेषः, जपमालागोपनार्थं वस्त्रनिर्मितयन्त्रम्, नक्रः, यज्ञविशेषः, मातलिपुत्रः ।

**गोलाङ्गूलः- (पु.)** गोर्लाङ्गूलवल्लाङ्गूलमस्येति गोलाङ्गूलः । अस्यार्थः- वानरः, कपित्थास्यः, दधिशोणः, नगाटनः, कृष्णवानरः।

**गोविन्दः-** गां=पृथ्वीं, धेनुम् उपनिषद्वाचो वा विन्दति=स्वीकरोति इति गोविन्दः । अस्यार्थो यथा- श्रीकृष्णः, विष्णुः, गवाध्यक्षः, बृहस्पतिः, परब्रह्म ।

**गोवृन्दम्- (क्ली.)** गवां वृन्दं=सङ्घरिति गोवृन्दम् अर्थात् गोसमूहः ।

**गोष्ठम्- (क्ली.)** गावः तिष्ठन्ति अत्र इति गोष्ठम् । अत्र स्था-धातोः **'सुपि स्थः'**[३७] इति सूत्रेण घञर्थे कप्रत्ययः । अर्थः- गोसङ्घातः, गोवृन्दम्, गोस्थानम्, गोठ इति भाषायाम् ।

**गोष्ठश्वः- (त्रि.)** गोष्ठे श्वा इति गोष्ठश्वः । **'अचतुर.... गोष्ठश्वाः'**[३८] इति सूत्रेण समासान्तः अच्-प्रत्ययः । अर्थः- स्थानस्थः, परद्वेषी ।

**गोसम्भवम्- (क्ली.)** गावः सम्भवो यस्येति गोसम्भवम् । अर्थः- गव्यम्, गोजातवस्तु ।

**गोसर्गः- (पु.)** अस्यार्थो विद्यते- प्रभातम् । व्युत्पत्तिरस्ति- गवां=सूर्यकिरणानां सर्गो=विसृष्टिः यस्मिनन्निति गोसर्गः ।

**गोस्तना- (स्त्री.)** गोः स्तन इव फलम् अस्याः इति गोस्तना । ङीषोऽभावपक्षे टाप् ।[३९] अस्यार्थो विद्यते गोस्तनी, द्राक्षा ।

**गोस्तनी- (स्त्री.)** गोः स्तन इव फलम अस्याः इति गोस्तनी । **'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्'**[४०] इति सूत्रेण स्त्रीत्वविवक्षायां ङीष्-प्रत्ययः । अस्यार्थो विद्यते- द्राक्षा, कपिलद्राक्षा, दाख, मुनक्का इति भाषायाम् ।

**गोस्वामी-** गवां स्वामी इति गोस्वामी । त्रिलिङ्गकस्य गोस्वामि-शब्दस्य अर्थो वर्तते- गोपतिः, गवाम्=इन्द्रियाणां स्वामी ।

**गवाक्षः-** (पु.) गवाम् अक्षि इव यः इति गवाक्षः । इत्यत्र **'अक्ष्णोऽदर्शनात्'**[४१] इति सूत्रेण समासान्तः अच्-प्रत्ययः । अस्य शब्दस्य प्रयोगः वातायानम्, वदूद्गयनम्, जालम्, जालकम्, (खिडकी, जाली इति भाषायाम्) इत्यर्थेषु भवति ।

**तद्धितान्ताः केचन गो-शब्दाः-**

**गोमयम्-** (क्ली. / पु.) गो-शब्दत् **'गोश्च पुरीषे'** [४२] इति सूत्रेण मयट्-प्रत्यये सति सम्पन्नस्य **गोमयम्** इत्यस्य अर्थो विद्यते- गवां गूथम्, गोविट्, जगलम्, गोहन्नम्, गोशकृत्, गोपुरीषम्, गोविष्ठा, गोमलम्, गोबर इति भाषषायाम् ।

**गोमान्-** (त्रि.) बहवो गावोऽस्यास्मिन् वा सन्तीति गोमान् । अत्र गो-शब्दत् **''तदस्यास्त्यस्मिन्निति मतुप्''**[४३] इति सूत्रेण मतुप् प्रत्ययः । अर्थो विद्यते- बहूनां गवां स्वामी, गवीश्वरः ।



Scanned with CamScanner

**गोमायुः**– गां विकृतां वाचं मिनोति इति गोमायुः । अत्र गो+डुमिञ्+उण् विद्यते । अर्थो विद्यते–शृगालः ।

**गोमी**– त्रिलिङ्गकः गोमिन्–शब्दः गो–शब्दात् मतुबर्थे **'ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्निति'**[४४] इति सूत्रेण मिनि प्रत्यये सति सम्पन्नो भवति । अस्यार्थो विद्यते– गोमान् इति ।

**गोयुगम्**– (क्ली.) **'द्वित्वे गोयुगच्'**[४५] इति वार्तिकेन गो–शब्दात् पशुमात्रद्वित्वसंख्यायां युगच् प्रत्ययः । अर्थः– उष्ट्र गोयुगम्, पशुद्वयम्, पशुयुग्मम्, धेनुयुग्मम् ।

**गव्यम्**– गोरिदम्, गोर्विकारः गवि=वाणे साधुः अथवा गवि=नेत्रे साधु गव्यं कथ्यते । अत्र **'गोपयसोर्यत्'**[४६] इति सूत्रेण यत्–प्रत्ययः 'वान्तो यि प्रत्यये'[४७] इत्यनेन अवादेशो भवति । अस्य शब्दस्य प्रयोगः गवां सर्वम्, गोसम्बन्धि, दुग्धगोमयादि, गोहितम्, ज्या, रागद्रव्यम् इत्येतेषु अर्थेषु भवति ।

**एकशेषः**

एकशेषविवक्षायां गोशब्दविषये **'पुमान् स्त्रिया'**[४८] इति सूत्रं प्रबाध्य **'ग्राम्यपशुसङ्घेष्वतरुणेषु'**[४९] इति सूत्रेण पुँल्लिङ्गस्त्रियोर्मध्ये स्त्री शिष्यते । यथा– इमे गावः इमाः गावः इति इमाः गावः । अत्र इदम्–शब्दस्य प्रयोगः लिङ्गनिर्देशाय विद्यते ।

**निष्कर्षः**– गो–शब्दः समासे भवेत्, कृदन्तो भवेद् आहोस्वित् तद्धितान्तः, 'गो–शब्दस्य यथा विभिन्नाः अर्थाः सन्ति, तथैव गोरपि विभिन्नाः लाभाः सन्ति, तदर्थं स्वहिताय, परहिताय, जगतः हिताय च गोजातेः रक्षा अस्माभिः सर्वैरपि करणीया ।

**सन्दर्भाः**–

१. उणादिसूत्रम् – २/६८

२. पाणीनीय–अष्टाध्यायी–सूत्रपाठः– ६/४/१५५

३. भागववते–९/२१/२५

४. महाभारते–३/३/५२

५. रघुवंशे – १/२६

६. बृहत्संहितायाम्–६१तमे अध्याये

७. अयं तु सप्तदशशतपरिमितशकाब्दप्रारम्भे एव मिथिलादेशान्तर्वर्तिनि 'मगरौणी' संज्ञकग्रामे विद्यानिधिपीताम्बरपण्डितात् जातः । अद्यावधि ज्ञाता अनेन विरचिता ग्रन्थास्त्वेते–१. दीधितिविद्योतः (शिरोमणिटीका) २. न्यायसिद्धान्ततत्त्वम् ३. पदवाक्यरत्नाकरः ४. मासमीमांसा ५. मिथ्यात्वनिरुक्ति ६. रश्मिचक्रम् (चिन्तामणिटीका) ७. रसमहार्णव ८.



Scanned with CamScanner

लाघवगौरवरहस्यम् ९. शिवशतकम् ।

८. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ७/३/८६

९. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- १/१/५

१०. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ६/१/४५

११. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ३/२/३

१२. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ६/४/६४

१३. भागवते-२/६/९

१४. कुमारसम्भवे-४/८

१५. ऋग्वेदे-५/५१/३

१६. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ३/२/६१

१७. ऋग्वेदे-६/१७/२

१८. भट्टिकाव्ये-१/३

१९. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ४/१/४

२०. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ४/२/५१

२१. देवीभागवते-१२/६/४१

२२. देवीभागवते-१२/६/४३

२३. ऋग्वेदे-१/४//२

२४. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ३/३/११७

२५. देवीभागवते-७/३०/६८

२६. २/३२/४२

२७. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ३/३/१२१

२८. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ५/४/११८



Scanned with CamScanner

२९. महाभारते-१३/१४९/६६

३०. ३/४९

३१. शार्दूलमृगसंघुष्टं सिंहैर्भीमबलैर्वृतम् । ऋक्षवानरगोपुच्छैर्मार्जारैश्च निषेवितम् । (रामायणे)

३२. गोपुच्छस्थे वल्मीकगेऽथवादर्शनं भुजङ्गस्य ।(बृहत्संहितायाम्)

३३. मूलविभुजादिभ्यः कः (वार्त्तिकम्)

३४. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ३/१/१२४

३५. महाभारते-१२/४१/१५

३६. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- २/१/६६

३७. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ३/२/४

३८. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ५/४/७७

३९. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ४/१/४

४०. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ४/१/५४

४१. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ५/४/७६

४२. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ४/३/१४५

४३. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ५/२/९४

४४. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ५/२/११४

४५. सम्प्रोदश्च कटच्- ५/२/११४ सूत्रोपरि वैयाकरणसिद्धान्तकौमुद्याम् ।

४६. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ४/३/१६०

४७. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ६/१/७९

४८. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- १/२/६७

४९. पाणिनीय-अष्टाध्यायी-सूत्रपाठः- १/२/७३

अध्यक्षः, अनुस्नातक-भवनम्

श्री सोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम् ।



Scanned with CamScanner

श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला - ३

# वाक्यार्थज्योतिः

## Vākyārthajyotiḥ

अङ्कः - 1 वर्षः - 2014-15

प्रधानसम्पादकः

प्रो. अर्कनाथः चौधरी

सम्पादकौ

डॉ. ललितकुमारः पटेलः

डॉ. जानकीशरणः आचार्यः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी

वेरावलम्

Scanned with CamScanner

प्रकाशकः -

डॉ. दशरथः जादवः

कुलसचिवः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी

राजेन्द्रभुवन रोड, वेरावलम् - ३६२ २६६

गीर-सोमनाथजनपदम्, गुजरातम्

दूरभाषः - ०२८७६-२४४५३२, फेक्स : २४४४१७

E-mail: sssu.veraval@gmail.com

www.shreesomnathsanskrituniversity.info

समन्वयकः -

डॉ. कार्तिकपण्ड्या

संशोधनाधिकारी

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

*© Shree Somnath Sanskrit University, 2017*

प्रथमं संस्करणम् - जनवरी - २०१७

प्रतयः - ३५०

ISBN - 978-93-83097-19-7

मूल्यम् - रु. २५०/-

मुद्रकः - जलाराम ग्राफिक्स एन्ड ओफसेट

परमहंस अेपार्टमेन्ट के पास,

होटल कावेरी के पीछे, एस.टी.रोड, वेरावल-३६२ २६६

जि. गीर सोमनाथ, गुजरात (भारत)

दूरभाष : (०२८७६) २२१८६१

Scanned with CamScanner

## विषयानुक्रमणिका


१. वैदिकव्याख्यायाः घटकतत्त्वपरिशीलनम् ०१-१०

**प्रो. देवेन्द्रनाथः पाण्डेयः**

२. काव्यशास्त्रीयः गुणविमर्शः ११-२०

**डो. नरेन्द्रकुमार एल. पण्ड्या**

३. 'ऍ' प्रत्याहार-विमर्शः २१-३०

**प्रो. विनोद कुमार झा**

४. अमोघत्वं भवभूतेः ३१-३९

**प्रो. अर्चना दुबे**

५. मृच्छकटिके वर्णिता राज्ञः राज्यस्य च विभावना ४०-४५

**डॉ. महेन्द्रकुमार अं. दवे**

६. वैदिकवाङ्मये दीक्षाविचारः ४६-५०

**डॉ. अमृतलालः भोगायता**

७. भारतीयप्रतिभातत्त्वचिन्तपरिप्रेक्ष्ये राजशेखरदिशा प्रतिभा ५१-५९

**डॉ. ललित पटेलः**

८. वर्तमानसमये पर्यावरणसंरक्षणस्यावश्यकता तदर्थं वैदिकोपायाः ६०-६७

**डॉ. शत्रुघ्नपाणिग्राही**

९. वसंस्कृतसाहित्यदृष्ट्या धर्मः ६८-७२

**डॉ. डायालाल एम. मोकरिया**

१०. आयुर्वेददृष्ट्या आरोग्यप्राप्तौ आहार-विहारयोः योगदानम् ७३-८१

**डॉ. पङ्कजकुमार एस्. रावलः**


Scanned with CamScanner

# 'रँ' प्रत्याहार-विमर्शः

✍ प्रो. विनोद कुमार झा

यथा वयं जानीमो यत् यत्र यत्र धूमः तत्र तत्र वह्निरिव यत्र यत्र लौकिकं संस्कृतं तत्र तत्र संस्कृतव्याकरणं वर्तते। अष्टविधं संस्कृतव्याकरणमिति प्रसिद्धम्। साम्प्रतं संस्कृतव्याकरणस्य प्रतिनिधिभूतं व्याकरणं पाणिनिव्याकरणम्। अस्य पाणिनि-व्याकरणस्य मूलाधारो विद्यते माहेश्वरसूत्राधारितः प्रत्याहारः। चतुश्चत्वारिंशत्संख्या-त्मकाः प्रत्याहाराः। तत्राऽस्ति 'रँ' प्रत्याहारोऽपि। अस्य 'रँ' प्रत्याहारस्य विषये प्राचीननव्यवैयाकरणयोर्मध्ये महान् विवादः। अत्र कः सिद्धान्तपक्ष इति जिज्ञासायां केचन विचारा उपस्थाप्यन्ते। परमार्थतः विषयेऽस्मिन् विदन्त एव प्रमाणम्।

"**उरँण् रपरः**[१]" इति सूत्रे यदि 'र' इत्यनेन वर्णस्य ग्रहणं स्यात्तर्हि 'कृष्णर्द्धिः' इत्यत्र 'कृष्ण+ऋर्द्धिः' इत्यवस्थायाम् अकारऋकारयोः स्थाने "**आद्गुणः**[२]" इति सूत्रेण गुणोऽकारः सन् तस्य अकारस्य अण्प्रत्याहारगतत्वात् ऋकारस्थानिकत्वाच्च "**उरँण् रपरः**" इत्यनेन रपरत्वेन उपस्थितिर्भवति तथा च 'कृष्णर्द्धिः' इत्यस्य सिद्धिर्जायते। 'तवल्कारः' इत्यस्य सिद्धिर्भवितुं न शक्नोति। 'तवल्कारः' इत्यस्य सिद्धिर्भवेद् एतदर्थम् अणः अकारस्य लपरत्वेन उपस्थितिरावश्यकी वर्तते। प्रसङ्गेऽस्मिन् "**तुल्यास्यप्रयत्नं सवर्णम्**"[३] इति सूत्रोपरि महाभाष्यकारो लिखति - '**लपरत्वं वक्ष्यामि**'। अस्याः पङ्क्तेर्व्याख्यां कुर्वता कैयटेन उच्यते- '**रँप्रत्याहाररूपेण व्याख्यास्यामि**'। अस्य 'रँ' प्रत्याहारस्य सिद्ध्यर्थं लघुसिद्धान्तकौमुद्यां, मध्यसिद्धान्तकौमुद्यां सिद्धान्तकौमुद्याश्च माहेश्वरसूत्राणां नीचैः "**लँण्**" सूत्रे अकारश्च एषा पाङ्क्तरागच्छति अर्थात् "लँण्" सूत्रस्थोऽकार इत्संज्ञको वर्तते। अनन्त्यत्वात् स्वराच्च पृथगुक्तिर्विद्यते। तेन इत्संज्ञक-अकारेण 'रँ' प्रत्याहारस्य सिद्धिर्भवति। अस्मिन् 'रँ' प्रत्याहारे वर्णद्वयमागच्छति- र्, ल्। एवम्प्रकारेण 'तव+लृकारः' अस्यां दशायाम् अकारलृकारयोः स्थाने 'अ' गुणः सन् दन्तस्थानिकस्य लृकारस्य स्थाने प्राप्तत्वाद् अकारस्य लपरत्वेन (अल्-रूपेण) उपस्थितिर्भवति। अत्र 'रँ' प्रत्याहारस्य

ज्ञानमपेक्षितमस्ति। 'रँ' प्रत्याहारस्य का सिद्धिप्रक्रियाऽस्ति, ततः पूर्वं प्रत्याहारविषयकं किञ्चिद्वैशिष्ट्यं ज्ञातव्यं विद्यतेऽत्र। यथा-

**विशेषः**- प्रत्याहारविधायके **''आदिरन्त्येन सहेता''**[४] सूत्रे पठितः 'आदि'[५] शब्दो माहेश्वरसूत्रेषु आदेरपेक्षां न करोति, अपितु माहेश्वरसूत्रेषु बुद्ध्या कल्पितसमुदाये आदेरपेक्षां करोति। यथा- 'इक्' प्रत्याहारः। एवमेव **''आदिरन्त्येन सहेता''** सूत्रे पठितः 'अन्त्य'[६] शब्दः माहेश्वरसूत्रेषु अन्त्यस्यापेक्षां न करोति, अपितु माहेश्वरसूत्रेषु बुद्ध्या कल्पितसमुदाये अन्त्यस्यापेक्षां करोति। यथा- 'रँ' प्रत्याहारः। 'रँ' प्रत्याहारस्य सिद्धिप्रक्रिया-

रँ (प्रत्याहारः)

| | |
|---|---|
| अन्त्यः (अन्तिमः) इत्सदृशः | : अँ। |
| तेन इत्सदृशेन सह आदिसदृशः | : रँ। |
| स्वस्य (स्व-स्वरूपस्य) वर्णौ | : र् अँ। |
| 'स्व' पदेन केवलं प्रत्याहारगतस्य आदिवर्णस्यैव ग्राहणं भवति। | : र्, ~~अँ~~। |
| प्रत्याहारे इत्संज्ञक-वर्णानां ग्रहणं न भवति। | : ~~र्~~, ल्। |
| मध्यस्थः (मध्ये स्थितः) वर्णः | : ल्। |
| स्वस्मिन् | : १+ |
| मध्यस्थो वर्णः | : १ |
| समाहत्य | : २ |

**ध्येयम्**- 'रँ' प्रत्याहारे 'र्' तथा 'अँ' वर्णौ माहेश्वरसूत्राणामपेक्षया आद्यन्तौ न भूत्वा बुद्ध्या कल्पितौ तथा आद्यन्तशब्दाभ्याम् आक्षिप्ते 'र्,ट्,ल्,अँ' इति समुदाये आद्यन्तौ वर्तेते।

**पूर्वपक्षः**- यदि ''लँण्'' सूत्रस्थोऽकारोऽनुनासिको वर्तते, तस्य इत्संज्ञा भवति। तेन च 'रँ' प्रत्याहारस्य सिद्धिर्भवति तर्हि ''अतोल्रान्तस्य'' सूत्रे पाणिनिर्लकारं नोच्चारयेत्, 'रँ' प्रत्याहारेणैव निर्वाहात्। उच्चार्यते च लकारः सूत्रे। तेन ज्ञातं भवति यत् ''लँण्'' सूत्रस्थोऽकारोऽनुनासिको नास्ति। नैव तस्य इत्संज्ञा भवति, नैव च 'रँ' प्रत्याहारस्य सिद्धिर्भवति। एवम्प्रकारेण ''अतोल्रान्तस्य'' सूत्रस्थो लकारः स्वसार्थकतां निदधाति।



**उत्तरपक्षः**- **''अतोल्रान्तस्य''**[७] सूत्रे लकारोच्चारणं विद्यते, एतेन इदं सिद्धं भवति यत् 'रँ' प्रत्याहारोऽनित्यो वर्तते, अर्थात् कुत्रचित् रेफेन 'रँ' प्रत्याहारस्य ग्रहणं भवति कुत्रचिच्च न भवति, तस्मादेव कारणात् 'कमलानाम्' इत्यत्र **''अट्कुप्वाङ्नुम्व्यवायेऽपि''**[८] इति सूत्रेण लकारात् परस्य नकारस्य स्थाने णत्वं न भवति, एवमेव 'प्रफुल्तः' इत्यत्र **''रदाभ्यां निष्ठातो नः पूर्वस्य च दः''**[९] इति सूत्रेण लकारात् परस्य निष्ठातकारस्य स्थाने नत्वं न भवति। तथा च 'रँ' प्रत्याहारस्य अनित्यत्वात्, प्रकृते **''अतोल्रान्तस्य''** सूत्रे रेफेन 'रँ' प्रत्याहारस्य ग्रहणाभावादस्ति अस्मिन् सूत्रे लकारोच्चारणमावश्यकम्।

**पूर्वपक्षः**- ''लँण्'' सूत्रस्थोऽकार इत्संज्ञकोऽस्ति इति स्वीकारे यथा 'रँ' प्रत्याहारस्य सिद्धिर्भवति तथैव 'यँ' प्रत्याहारस्यापि सिद्धत्वात् तस्य 'यण्' इव य्, व्, र्, ल् इति चतुर्णां वर्णानां बोधकाच्च बहुषु यणपदघटितसूत्रेष्वर्द्धमात्रालाघवानुरोधेन 'यँ' प्रत्याहारेणैव व्यवहरेत् पाणिनिः, किन्तु तथा नास्ति, अतः ''लँण्'' सूत्रस्याकारो नास्ति इत्संज्ञकः।

**आन्तरिकः प्रश्नः-१.** बहुषु यणपदघटितसूत्रेषु 'यण्' प्रत्याहारस्य स्थाने 'यँ' प्रत्याहारेण व्यवहारादनेकासां मात्राणां लाघवो भवति, कथं तर्हि महावैयाकरणेन नागेशभट्टेन बहुषु यणपदघटितसूत्रेष्वर्द्धमात्रालाघवानुरोधेन 'यँ' प्रत्याहारेणैव व्यवहरेदिति लिख्यते?

**उत्तरम्**- 'बहुषु यणपदघटितसूत्रेष्वर्द्धमात्रालाघवानुरोधेन 'यँ' प्रत्याहारेणैव व्यवहरेत्' अस्य तात्पर्यं विद्यते- यत्र यत्र 'यण्' प्रत्याहारस्य स्थाने 'यँ' प्रत्याहारस्य व्यवहारेण अर्द्धमात्राया लाघवो भवति तत्रैव 'यँ' प्रत्याहारस्य व्यवहारः करणीयः। यथा- **''संयोगादेराधातोर्यण्वतः''**[१०] सूत्रेऽस्मिन् 'यण्वतः' इत्यस्य स्थाने 'यवतः', ''इको यणचि'' इत्यस्य स्थाने ''य इकोचि'', ''इणो यण्'' इत्यस्य स्थाने ''य इणः'' इति न्यासकरणेन अर्द्धमात्राया लाघवो वर्तते। **''इग्यणः सम्प्रसारणम्''**[११] इत्यादिस्थलेषु 'यणः' इत्यस्य स्थाने 'यस्य' इति न्यासकरणेन अर्द्धमात्राया लाघवो नास्ति, तस्मादत्र 'यँ' प्रत्याहारस्य प्रयोगो न विधातव्यः, अत एव भट्टमहोदयेन 'बहुषु यणपदघटितसूत्रेषु' उक्तं न तु 'सर्वेषु यणपदघटितसूत्रेषु' इति।

**आन्तरिकः प्रश्नः-२.** उपर्युक्तप्रकारेणापि नैकेषु सूत्रेषु अर्द्ध-अर्द्धमात्राया लाघववशात् सर्वं समाहत्य अनेकमात्राणां लाघवो वर्तते, अस्यां परिस्थितौ 'बहुषु

Scanned with CamScanner

यण्पदघटितसूत्रेष्वर्द्धमात्रालाघवानुरोधेन' कथनं कथमुचितमस्ति?

उत्तरम्- अत्र केषाञ्चिद् विदुषां मतं विद्यते यत् प्रकृतस्थले शेखरकारस्य अभिप्रायो विद्यते- 'वर्णसमाम्नाये अर्द्धमात्रालाघवानुरोधेन बहुषु यण्पदघटितसूत्रेषु 'यँ' प्रत्याहारेणैव व्यवहरेत्' अर्थात् वर्णसमाम्नाये "लँण्" सूत्रे यदि अर्द्धमात्रारूपस्य णकारस्य (ण्) ग्रहणं न भवति, तर्हि अर्द्धमात्रालाघवानुरोधेन बहुषु यण्पदघटितसूत्रेषु 'यँ' प्रत्याहारेणैव व्यवहरेदिति।

आन्तरिकः प्रश्नः-३. "लँण्" सूत्रे णकारस्य ग्रहणाभावे "**अणुदित्सवर्णस्य चाऽप्रत्ययः**"[११] सूत्रस्थो 'अण्' प्रत्याहारः, यः परणकारेण अर्थात् "लँण्" सूत्रस्याऽकारेण गृह्यते, तस्य स्थाने 'आ' प्रत्याहारः स्यात्। एवं सति "**आ सर्वनाम्नः**"[१२] इत्यत्र 'आ' इत्यनेन प्रत्याहारस्य ग्रहणं भवेदाहोस्विद् वर्णस्य इति शङ्का समुद्भवति। एवमेव 'इण्' प्रत्याहारः, यः परणकारेण गृह्यते, अस्य स्थाने 'यँ' प्रत्याहारः स्यात्। तथा सति "**योऽचि**"[१४], "**यस्येति च**"[१५], "**यस्य विभाषा**"[१६] इत्यादिषु 'य' इत्यनेन प्रत्याहारस्य वर्णस्य वा ग्रहणं स्यादिति शङ्का समुत्पद्यते। 'य' इत्यनेन प्रत्याहारे गृहीते "**जातेरस्त्रीविषयादयोपधात्**"[१७] सूत्रेऽस्मिन् 'अयोपधात्' इति पदस्य ग्रहणात् 'महाशूद्र' इत्यस्य योपधत्वेन स्त्रीत्वे द्योत्ये 'महाशूद्री' प्रयोगे 'ङीष्' न प्राप्नोति। अत्र सर्वत्र स्थलेषु व्याख्यानेन निर्णयस्वीकारे महान् गौरवः सह्यो भवति। तस्मात् "लँण्" सूत्रे णकारस्य ग्रहणं कर्तव्यमेव। तथा सति 'बहुषु यण्पदघटितसूत्रेष्वर्द्धमात्रालाघवानुरोधेन' कथनं पूर्ववत् नोचितमेवाऽस्ति।

उत्तरम्- **प्रत्येकम्** इति पदस्य अध्याहारं विधाय शेखरोक्तपङ्क्त्या यदि 'प्रत्येकमर्द्धमात्रालाघवानुरोधेन बहुषु यण्पदघटितसूत्रेषु 'यँ' प्रत्याहारेणैव व्यवहरेत्' अर्थात् यत्र 'यणः' स्थाने 'यँ' प्रत्याहारस्य प्रयोगो भवति तत्र प्रत्येकं स्थाने अर्द्धमात्रालाघवानुरोधेन बहुषु यण्पदघटितसूत्रेषु 'यँ' प्रत्याहारेणैव व्यवहरेत्' इति व्याख्या क्रियते चेत्रास्ति अनेकासां मात्राणां लाघवरूपदोषः। अस्यां दशायां 'प्रत्येकमर्द्धमात्रालाघवानुरोधेन बहुषु यण्पदघटितसूत्रेषु 'यँ' प्रत्याहारेणैव व्यवहरेत् पाणिनिः, किन्तु अर्द्धमात्राया लाघवम् अस्वीकृत्य पाणिनिना 'यण्' प्रत्याहारः प्रयुज्यते, तेन सिद्धं भवति यत् "लँण्" सूत्रस्थोऽकारोऽनुनासिको नास्ति।

**उत्तरपक्षः - अनुनासिकस्य "लँण्"** सूत्रस्याऽकारस्य इत्संज्ञानन्तरं तेन इत्संज्ञकेन केवलं 'रँ' प्रत्याहारस्यैव सिद्धिर्भवति न तु 'यँ' प्रत्याहारस्य। 'रँ' प्रत्याहार इव यदि 'यँ'



प्रत्याहारस्य निर्माणं क्रियते तर्हि "**योऽचि**", "**यस्य हलः**"[१८], "**यस्येति च**" इत्यादिषु 'य' इत्यनेन प्रत्याहारस्य वर्णस्य वा ग्रहणं स्यादिति शङ्का समुत्पद्यते। अस्याः शंकायाः समाधानाय व्याख्यानाश्रयणे महान् गौरवो भवति, अतः महान्तं गौरवं दूरीकर्तुं "लँण्" सूत्रे णकारग्रहणस्य आवश्यकता तथा च अण्-इण्-यण्-प्रत्याहारैः णकारग्रहणस्य सार्थकता विद्यते। तस्मात् "लँण्" सूत्रस्याऽकारोऽनुनासिक इति स्वीकारे, तेन अनुनासिक-अकारेण केवलं 'रँ' प्रत्याहारे स्वीकारे नास्ति काचित् बाधा।

२. "**पर्यायशब्दानां लाघवगौरवचर्चा नाद्रियते**" तस्मादेव करणाद् लाघवानुरोधेन "**विसर्जनीयस्य सः**"[१९] सूत्रे '**विसर्जनीयस्य**' स्थाने '**विसर्गस्य**' यथा नोक्तं पाणिनिना तथैव प्रकृतावपि 'यण्', 'यँ' इत्यनयोः पर्यायवाचिनोः शब्दयोर्मध्ये लाघवगौरवचर्चाया अनादरत्वात् बहुषु यण्पदघटितसूत्रेषु अर्द्धमात्राया लाघवमनादृत्य 'यण्' प्रत्याहार एव व्यवहृतः पाणिनिना।

**पूर्वपक्षः**- यदि "लँण्" सूत्रस्थोऽकार इत्संज्ञको वर्तते इति मन्यते चेत् 'प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न' अर्थात् प्रत्याहारे=वर्णसमाम्नाये य एतेऽक्षु=अज्बोधकसूत्रेषु प्रत्याहारार्था अनुबन्धाः क्रियन्ते तेषामज्ग्रहणेन ग्रहणं कस्मात्र भवति? अस्य प्रश्नस्य उत्तरं कुर्वता महाभाष्यकारेण त्रयो हेतवः प्रस्तुताः- १. आचारात् २. अप्रधानत्वात् ३. लोपः बलवत्तरः। लोपस्य बलवत्त्वात् इत्संज्ञानन्तरं वर्णस्य लोपो भवति, तस्माद् अज्बोधकसूत्रेषु प्रत्याहारार्था य अनुबन्धाः क्रियन्ते तेषाम् अज्बोधकप्रत्याहारेषु ग्रहणं न भवति। अत्र 'लोपः बलवत्तरः' इति तृतीयहेतौ अव्यापकत्वापत्तिर्वर्तते। कथमस्ति अव्यापकत्वापत्तिरस्य ज्ञानं अनुमितिप्रक्रियया करणीयम्। अनुमानवाक्यं वर्तते- अनुबन्धाः प्रत्याहारजन्यबोधविषयत्वाभाववन्तः लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वात् अर्थात् "**तस्य लोपः**"[२०] इति लोपशास्त्रस्य उद्देश्यतावच्छेदकत्वेन=इत्संज्ञकत्वेन अनुबन्धानाम् आक्रान्तत्वाद् अर्थात् इत्संज्ञालोपाभ्यां तेषाम् अपहाराद् अनुबन्धाः प्रत्याहारजन्यबोधविषयत्वाभाववन्तो भवन्ति। अत्र साध्यः प्रत्याहारजन्यबोध-विषयत्वाभावः हेतुश्चलोपशास्त्रीयोद्देश्यता-वच्छेदकाक्रान्तत्वं वर्तते। प्रकृत-स्थले "लँण्" सूत्रस्थ-अकाररूपे अनुबन्धे साध्यत्वं=प्रत्याहारजन्यबोधविषयत्वाभाववत्त्वन्तु वर्तते, किन्तु लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वरूपः=इत्संज्ञकत्वरूपो हेतुर्नास्ति। अतो वर्तते तृतीयहेतौ अव्यपकत्वापत्तिः। अत्र यदि उच्यते- यत्र हेतुना साध्यस्य अनुमितिः क्रियते

Scanned with CamScanner

तत्र साध्यस्य व्यापकत्वं हेतोश्च अव्यापकत्वम् इष्टमेव भवति । अस्यां परिस्थितौ हेतोरव्यापकत्वेन उपस्थापनं दोषकरं कथं स्याच्चेत् श्रोतव्यम् ।

अनुमितेः प्रकारद्वयं भवति ।

१. पक्षतावच्छेदक-समानाधिकरण्येन

२. पक्षतावच्छेदकावच्छेदेन ।

प्रथमे प्रकारे यस्मिन् अधिकरणे अनुमितिः करणीया भवति, हेतोः तदधिकरणवृतित्त्वम् अपेक्षितं भवति । पक्षतावच्छेदकावच्छेदेन अनुमितिस्थले पक्षतावच्छेदकावच्छिन्नेषु सर्वेषु पक्षेषु हेतोर्वृत्तिता अपेक्षिता भवति । उदाहरणरूपेण यदि पर्वतत्वावच्छेदेन सकलपर्वतेषु वह्नेः सिद्धिः करणीया स्यात्, तर्हि सकलेषु पर्वतेषु धूमो भवेदिति अनिवार्यमस्ति, तदैव धूमरूपो हेतुरयं पक्षतावच्छेदकपर्वतत्वस्य व्यापको भवति । यदि एकस्मन्नपि पर्वते धूमस्य अभावो स्यात्, तर्हि पक्षतावच्छेदकं प्रति धूमस्य व्यापकता न भवति, तथा च अनेन अव्यापकहेतुना पर्वतत्वावच्छेदेन अनुमितिर्भवितुं न शक्नोति ।

प्रकृतस्थलेऽपि अनुमितिः पक्षतावच्छेदकावच्छेदेन विद्यते । अत्रानुमितौ पक्षो वर्तते- अनुबन्धः, साध्यो वर्तते- प्रत्याहारजन्यबोधविषयत्वाभावः । तथा हेतुर्वर्तते- लोपशास्त्रीयोद्देश्यतावच्छेकाक्रान्तत्वम्=इत्संज्ञकत्वम् । अत्र "लँण्" सूत्रस्थ-अकाररूपे अनुबन्धे प्रत्याहारजन्यबोधविषयत्वाभावरूपस्य साध्यस्य सिद्धिः तदैव भवितुं शक्नोति यदा "लँण्" सूत्रस्थ-अकार-अनुबन्धरूपे पक्षे लोपशास्त्रीयोद्देश्यतावच्छेकाक्रान्तत्वम्= इत्संज्ञकत्वम् भवेत् । "लँण्" सूत्रस्थ-अकाररूपे अनुबन्धे इत्संज्ञायोग्यत्वम् अनुबन्धत्वन्तु वर्तते, किन्तु तत्र हेतुः- लोपशास्त्रीयोद्देश्यतावच्छेकाक्रान्तत्वम्=इत्संज्ञकत्वम् नास्ति । कथं नास्ति, यतोहि अनुबन्धो द्विविधो भवति- प्रथमन्तावत् इत्संज्ञायोग्यत्वम् अनुबन्धत्वम्, द्वितीयन्तु इत्संज्ञकत्वम् अनुबन्धत्वम् । वर्णानाम् उपदेशकाले अत्र "लँण्" सूत्रस्थ-अकाररूपे अनुबन्धे इत्संज्ञायोग्यत्वम् अनुबन्धत्वन्त्वस्ति किन्तु इत्संज्ञकत्वम् अनुबन्धत्वं नास्ति । इत्संज्ञकत्वम् अनुबन्धत्वं कथं नास्ति, इत्युक्ते सति कारणम् अत्रास्ति । व्याकरणे पञ्चधा महावाक्यानि सन्ति । यथा- १. वर्णानाम् उपदेशः २. उपदेशोत्तरकाला इत्संज्ञा ३. इत्संज्ञोत्तरकालं प्रत्याहारनिर्माणम् ४. प्रत्याहारोत्तरकाला सवर्णसंज्ञा ५. सवर्णसंज्ञोत्तरकाला सवर्णग्राहकता । अत्र ध्यानं दातव्यं यत् पञ्चधा महावाक्येषु



प्रथमः क्रमो वर्तते- वर्णानाम् उपदेशस्य तृतीयश्च क्रमो वर्तते- प्रत्याहारनिर्माणस्य । प्रत्याहारेष्वपि सर्वप्रथमः प्रत्याहारः 'हल्' विद्यते । अनन्तरम् अन्येषां प्रत्याहाराणां सिद्धिर्भवति, तस्मात् 'हल्' प्रत्याहारसिद्धेः प्राग् 'अच्' प्रत्याहारो नास्ति, 'अच्' प्रत्याहाराभावात् 'अच्' पदार्थस्य निष्पत्त्यभावेन "**उपदेशेऽजनुनासिक इत्**" सूत्रस्य वाक्यार्थाभावात् "लँण्" सूत्रस्थाकारस्य इत्संज्ञा न सम्भवति । इत्संज्ञाभावात् "लँण्" सूत्रस्थ-अकारानुबन्धरूपपक्षे इत्संज्ञकत्वम् अनुबन्धत्वं नास्ति अपितु इत्संज्ञाया योग्यतावशात् तत्र केवलम् इत्संज्ञायोग्यत्वम् अनुबन्धमस्ति । एवम्प्रकारेण "लँण्" सूत्रस्थ-अकाररूपे अनुबन्धपक्षे लोपशास्त्रीयोद्देश्यतावच्छेकाक्रान्तत्वम् अर्थात् इत्संज्ञकत्वं नास्ति, अतः **लोपः बलवत्तरः** इति तृतीयहेतौ अस्ति अव्यापकत्वापत्तिः ।

**उत्तरपक्षः**- सर्वप्रथमन्तु इत्संज्ञकत्वम् अनुबन्धत्वम् इत्यनुसारं तृतीयहेतौ अव्यापकत्वापत्तिरेव नास्ति, "लँण्" सूत्रस्य उपदेशकाले लकारोत्तरवर्तिनः अँकारस्य इत्संज्ञकत्वाभावात् । इत्संज्ञायोग्यत्वम् अनुबन्धत्वम् इत्यनुसारं यदि अस्ति दोषः तथापि नास्ति काचन चिन्ता यतोहि अव्याप्यवृत्तिः हेतुरपि अनुमापकत्वेन दृश्यते । यथा- अयं वृक्षो द्रव्यं कपिसंयोगात् । अत्र मूलावच्छेदेन वर्तमानः कपिसंयोगः वृक्षस्य द्रव्यत्वे अनुमापको वर्तते, तथैव प्रकृतेऽपि अव्याप्यवृत्तिः हेतुरपि अनुमापकत्वेन भवितुं शक्नोति । वस्तुतस्तु 'प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न' अस्य व्याख्यां कुर्वन् महाभाष्यकारः कथयति- प्रत्याहारे=वर्णसमाम्नाये य एतेऽक्षु=अज्बोधकसूत्रेषु प्रत्याहारार्था अनुबन्धाः क्रियन्ते तेषामज्ग्रहणेन ग्रहणं कस्मात्र भवति? अत्र 'अक्षु=अज्बोधकसूत्रेषु य एते प्रत्याहारार्था अनुबन्धाः क्रियन्ते' अनेन भाष्येण तु सुस्पष्टं वर्तते यत् पक्षतावच्छेदकः 'अज्बोधकसूत्रस्थानुबन्धत्वम्' एव अस्ति न तु 'अनुबन्धत्वम्' । अस्यां परिस्थितौ यदा "लँण्" सूत्रस्य अकारः पक्ष एव नास्ति तदा तत्र अनुबन्धरूपे पक्षे तृतीयहेतोरव्यापकत्वापत्तेः प्रश्नः कुतः समुद्भवति? अर्थात् प्रश्नो न समुद्भवति । अतः "लँण्" सूत्रस्थोऽकार अनुनासिको वर्तते, तस्य इत्संज्ञा भवति तथा च तेन 'रँ' प्रत्याहारस्य सिद्धिर्भवति । नास्ति अत्र सन्देहः ।

**पूर्वपक्षः**- अत्र तृतीयहेतौ अव्यापकत्वापत्तिर्न स्यात्, किन्तु "लँण्" सूत्रस्याऽकारस्य इत्संज्ञालोपाभ्याम् अपहाराभावात् तस्य 'हल्' प्रत्याहारे ग्रहणेन अन् (प्राणने) धातोः कर्तरि क्विपि प्रत्यये, सर्वापहारिलोपे "**अनुनासिकस्य क्विझलोः क्ङिति**" इति

Scanned with CamScanner

सूत्रेण उपधादीर्घः, प्रातिपदिकसंज्ञा, सम्बोधने प्रथमा-विभक्तेरेकवचनम् (सुँ), तस्य लोपः, सम्बुद्धिप्रयुक्तः नलोपाभावः, अतः परं 'हे आन्! माम्+त्रायस्व' इत्यर्थस्य विवक्षायां 'माम्+आँत्रायस्व' इति स्थितौ "लँण्" सूत्रस्याऽकारेण अनुनासिकाकारस्य 'आँ' इत्यस्य ग्रहणात् "**मोऽनुस्वारः**"[११] इति सूत्रेण 'आँ' इति हलि परे पदान्तमकारस्य स्थाने अनुस्वारापत्तिर्दुर्वाराऽस्ति।

न च व्यक्तिपक्षे "लँण्" सूत्रस्थस्य अकारस्य लक्ष्यस्थ-आँकारस्य च परस्परं भिन्नत्वात् "लँण्" सूत्रस्थाकारेण लक्ष्यस्थ-आँकारस्य ग्रहणत्वाभावेन 'मामाँस्त्रायस्व' इत्यत्र नास्ति अनुस्वारापत्तिरिति वाच्यम्, "**अणुदित्सवर्णस्य चाऽप्रत्ययः**" सूत्रे अण्ग्रहणं प्रत्याख्याय जातिपक्षस्यैव भाष्यकृता सिद्धान्तितत्वात्। अन्यथा 'अवात्ताम्' इत्यत्र 'अ वस् स्+ताम्' इत्यवस्थायां "**झलो झलि**"[२४] इति सूत्रेण झलः सकारस्य लोपो न स्यात् व्यक्तिपक्षे झल्-प्रत्याहारस्थ-तकारस्य लक्ष्यस्थ-तकारेण सह भिन्नत्वात्।

न च "लँण्" सूत्रस्थोऽकारो ह्रस्वो विद्यते तस्मात् ह्रस्वत्व-समानाधिकरण-अकारस्यैव 'हल्' प्रत्याहारे ग्रहणेन 'मामाँस्त्रायस्व' इत्यत्र लक्ष्यस्थ-आँकारस्य दीर्घत्वात् नास्ति दोषरिति वाच्यम्, अन् (प्राणने) धातोः कर्तरि विच्- प्रत्यये, सर्वापहारिलोपे "**अनुनासिकस्य क्विझलोः क्ङिति**" इति सूत्रेण विहितम् उपधादीर्घं विहाय पूर्ववत् अन्येषु कार्येषु सत्सु 'हे अन्! माम्+त्रायस्व' इत्यर्थस्य विवक्षायां 'माम्+अँत्रायस्व' इति स्थितौ "**मोऽनुस्वारः**" इति सूत्रेण 'अँ' इति हलि परे पदान्तमकारस्य स्थाने अनुस्वारापत्तेर्दुर्वारत्वात्।

किञ्च 'सोऽस्ति' इत्यत्र सस्+अस्ति इत्यवस्थायाम् अकारे हलि परे "**एतत्तदोः सुँलोपोऽकोरनञ्समासे हलि**"[२५] सूत्रेण सुँ(स्)लोपापत्तिर्दुर्वारास्ति। अतः "लँण्" सूत्रस्य अकारोऽनुनासिको न स्वीकर्तव्यः। 'तवल्कारः' इत्यस्य सिद्धिर्भवेत् तदर्थं "**ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्**" वार्तिकमिव "**उरण् रँपरः**" इत्यस्य स्थाने "**उरण् रलपरः**" इति न्यासो भवेदिति '**लपरत्वं वक्ष्यामि**' इति भाष्यस्य आशयः।

**उत्तरपक्षः**:- "लँण्" सूत्रस्याऽकारस्य इत्संज्ञालोपाभ्याम् अपहाराभावात् तस्य 'हल्' प्रत्याहारे ग्रहणेन "**अदेङ् गुणः**"[२६], "**आद्गुणः**", "**कुमारः श्रमणादिभिः**"[२७] इत्यादिषु पाणिनि-निर्देशेषु क्रमशः णकारोत्तरस्य रेफोत्तरस्य च अकारस्य हल्त्वात् तस्मात् परस्य सुँसम्बन्धिनः अपृक्तसंज्ञकस्य सकारस्य (स्) "**हल्ङ्याब्भ्यो**



**दीर्घात्सुतिस्यपृक्तं हल्**"[२८] इति सूत्रेण लोपः स्यात्, किन्तु तथा नाऽस्ति। तस्मात् परिकल्प्यते यत् "लँण्" सूत्रस्याऽकारः 'रँ' प्रत्याहातिरिक्तस्य कस्यचिदपि अन्यप्रत्याहारस्य प्रयोजको नास्ति।

किञ्च एतत्तच्छब्दयोर्विषये अकारस्य 'हल्' प्रत्याहारे ग्रहणेन तस्माद् अकारात् परस्य 'सुँ' प्रत्ययस्य "**हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्**" इति सूत्रेणैव लोपत्वात् "**एतत्तदोः सुँलोपोऽकोरनञ्समासे हलि**" सूत्रेण विहितं सुँलोपविधानं व्यर्थीभूय ज्ञापयति यत् "लँण्" सूत्राऽकारः 'रँ' प्रत्याहारातिरिक्तस्य कस्यचन अन्यप्रत्याहारस्य प्रयोजको नास्ति। अतः "लँण्" सूत्राऽकारस्य 'हल्' प्रत्याहारे ग्रहणाभावात् 'मामाँस्त्रायस्व', 'मामँस्त्रायस्व', 'सोऽस्ति' इत्यादिषु अनुस्वारसुँलोपापत्तिरूपो दोषो नास्ति।

किञ्च "**दिव् औत्**"[२९] इति सूत्रे स्वयं नागेशभट्टेन उक्तमस्ति यत् **उच्चारणार्थानामपीत्सञ्ज्ञोचिता** अर्थात् उच्चारणार्थकवर्णानामपि निवृत्तिरित्संज्ञालोपाभ्यामेव भवति। तथा सति भट्टमहोदयानां मतेऽपि वर्णानामुपदेशकाले प्रत्याहाराभावात् प्रत्याहारेष्वपि 'हल्' प्रत्याहारसिद्धेः प्राग् 'अच्' पदार्थस्य निष्पत्त्यभावेन "**उपदेशेऽजनुनासिक इत्**" सूत्रस्य वाक्यार्थाभावात् "हयवरट्" प्रभृतिदशसूत्राणां हकारादिषु उच्चारणार्थक-अकारे इत्संज्ञायोग्यत्वानुबन्धत्वरूपस्य पक्षस्य सत्त्वात् लोपशास्त्रीयोद्देश्यतावच्छेकाक्रान्तत्वरूपहेतोश्च असत्त्वात् '**लोपः बलवत्तरः**' इति तृतीयहेतौ अस्ति अव्यापकत्वापत्तिः।

**निष्कर्षः**:- अतः 'तवल्कारः' इत्यस्य सिद्ध्यर्थं "**उरण् रँपरः**" इति न्यासस्य स्थाने "**उरण् रलपरः**" इति न्यासं मत्वा 'रँ' प्रत्याहास्य खण्डनापेक्षया 'रँ' प्रत्याहारस्वीकारे एव लाघवो वर्तते, तस्मात् 'रँ' प्रत्याहारः स्वीकरणीयः।

***

**पादटिप्पणयः**

१. पा. अ. सूत्रपाठः- १/१/५१
२. पा. अ. सूत्रपाठः- ६/१/८७
३. पा. अ. सूत्रपाठः- १/१/१४
४. पा. अ. सूत्रपाठः- १/१/७१

Scanned with CamScanner

५. यस्मात्पूर्वं नास्ति परमस्ति स आदिः।

६. यस्मात्परं नास्ति पूर्वमस्ति सोऽन्त्यः।

७. अतोल्रान्तस्य- ७/२/२- ल्र इति लुप्तषष्ठीकम्। अतः समीपौ यौ ल्रौ तदन्तस्याङ्गस्यातो वृद्धिः स्यात्परस्मैपदपरे सिचि।

८. पा. अ. सूत्रपाठः- ८/४/२९

९. पा. अ. सूत्रपाठः- ८/२/४२

१०. पा. अ. सूत्रपाठः- ८/२/४३

११. पा. अ. सूत्रपाठः- १/१/४५

१२. पा. अ. सूत्रपाठः- १/१/६९

१३. पा. अ. सूत्रपाठः- ६/३/९१

१४. पा. अ. सूत्रपाठः- ७/२/८९- अनयोर्यकारादेशः स्यादनादेशेऽजादौ परतः।

१५. पा. अ. सूत्रपाठः- ६/४/१४८

१६. पा. अ. सूत्रपाठः- ७/२/१५- यस्य क्वचिद्विभाषयेड्विहितस्ततो निष्ठाया इण्न स्यात्।

१७. पा. अ. सूत्रपाठः- ४/१/६३

१८. पा. अ. सूत्रपाठः- ६/४/४९

१९. पा. अ. सूत्रपाठः- ८/३/३४

२०. पा. अ. सूत्रपाठः- १/३/९

२१. पा. अ. सूत्रपाठः- १/३/२ २२

२२. पा. अ. सूत्रपाठः- ६/४/१५

२३. पा. अ. सूत्रपाठः- ८/३/२३

२४. पा. अ. सूत्रपाठः- ८/२/२६

२५. पा. अ. सूत्रपाठः- ६/१/१३२

२६. पा. अ. सूत्रपाठः- १/१/२

२७. पा. अ. सूत्रपाठः- २/१/७०

२८. पा. अ. सूत्रपाठः- ६/१/६८

२९. पा. अ. सूत्रपाठः- ७/१/८४


***

Scanned with CamScanner

# त्रयी चिंतन

## સંસ્કૃત સાહિત્ય અને દર્શનોમાં મનોવૈજ્ઞાનિક અભિગમ

**PART - II**




✦ Publisher ✦
**PRINCIPAL**
Smt. C. P. Choksi Arts and
Shree P. L. Choksi Commerce College.
Veraval.

Scanned with CamScanner

त्रयी चिंतन (TRAYEE CHINTAN)
સંસ્કૃત સાહિત્ય અને દર્શનોમાં મનોવૈજ્ઞાનિક અભિગમ

© Sampaadak - Prin. Dr. R. P. Mehta

©Sahsampaadak - Dr. A. M. Chocha
- Prof. S. J. Vaghela
- Dr. N. R. Suba

(પ્રસ્તુત પુસ્તકમાં રજૂ કરેલી દરેક બાબતોની જવાબદારી જે તે લેખનકર્તાની છે.)

પ્રાપ્તિ સ્થાન : Smt. C. P. Choksi Arts and Shree P. L. Choksi Commerce College, Veraval.

ISBN No. 978-93-86103-14-7

પ્રથમ આવૃત્તિ : ૨૦૧૬

કિંમત : · ૩૫૦/—

**Publisher :**
**PRINCIPAL**
Smt. C. P. Choksi Arts and
Shree P. L. Choksi Commerce College.
Veraval.

**Setting & Printing**
**Kamlesh Prakashan Mandir**
G-52, Neo Square, P.N. Marg,
Near Income Tax Office,
Jamnagar - 361008.
Contact : 9879427072 / 9824163463
E-mail : kamleshprakashan@gmail.com

Scanned with CamScanner

| | | |
|---|---|---|
| 76 | श्रीमद् भागवत में मनोवैज्ञानिक अभिगम दिपेन महेता – पीएच.डी. शोधछात्र | 194 |
| 77 | शिवानी के उपन्यासों में मनोवैज्ञानिकता સંગીતાબેન આર. માહલા શામળદાસ આર્ટ્સ કોલેજ ભાવનગર | 196 |
| 78 | आस्तिकनास्तिकदर्शनेषु मनोनिरूपणम् राहुल बोरिसागर, श्री सांदीपनि विद्यानिकेतन - पोरबंदर | 199 |
| 79 | गीता के अनुसार 'मन' तत्त्व प्रो. डॉ. विनोद कुमार झा श्री सोमनाथ संस्कृत विश्वविद्यालय, वेरावल, | 201 |
| 80 | प्राचीन ग्रन्थों में शिक्षण और मूल्य डो. महेन्द्रकुमार अं. दवे साहित्य विभाग, रीडर, श्री सोमनाथ संस्कृत युनीवर्सिटी वेरावलम् जि.गीर -सोमनाथ. | 203 |
| 81 | संस्कृतसुभाषतेषु छात्रेभ्यः मनोवैज्ञानिकोपदेशाः Matang M. Goswai Asst. Professor, Faculty of Education, Kadi Sarva Vishwavidyalaya, Gandhinagar. | 206 |
| 82 | मानसिक स्वास्थ्य में योग, मनिषा बी. राम श्री वेळाकोट प्रा. शाळा, गीर गढडा | 209 |


..........



Scanned with CamScanner

# गीता के अनुसार 'मन' तत्त्व

प्रो. डॉ. विनोद कुमार झा
श्री सोमनाथ संस्कृत विश्वविद्यालय, वेरावल,

शरीर, इन्द्रिय और मन-इन सब का नाम आत्मा है। जिस जीवात्मा द्वारा मन और इन्द्रियों सहित शरीर जीता हुआ है, उस जीवात्मा का तो वह आप ही मित्र है और जिसके द्वारा मन तथा इन्द्रियों सहित शरीर नहीं जीता गया है, उसके लिये वह आप ही शत्रु के सदृश शत्रुता में बर्तता है। यथा-

**बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः ।**
**अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥**[1]

इस श्लोक का गूढार्थ प्रश्नोत्तर शैली में इस प्रकार समझ सकते हैं। **प्रश्न** - मन और इन्द्रियों सहित शरीर को जीतना क्या है ? ये किस प्रकार जीते जा सकते हैं ? जीते हुए शरीर, इन्द्रिय और मन के क्या लक्षण हैं ? एवं इन को जीतने वाला मनुष्य आप ही अपना मित्र कैसे है ? **उत्तर**- शरीर, इन्द्रिय और मन को भलीभाँति अपने वश में कर लेना ही इनको जीतना है। विवेकपूर्वक अभ्यास और वैराग्य के द्वारा ये वश में हो सकते हैं। परमात्मा की प्राप्ति के लिये मनुष्य जिन साधनों में अपने शरीर, इन्द्रिय और मन को लगाना चाहे, उनमें जब वे अनायास ही लग जायँ और उसके लक्ष्य से विपरीत मार्ग की ओर ताकें ही नहीं, तब समझना चाहिये कि ये वश में हो चुके हैं। जिस मनुष्य के शरीर, इन्द्रिय और मन वश में हो जाते हैं, वह अनायास ही संसार-समुद्र से अपना उद्धार कर लेता है एवं परमानन्दस्वरूप परमात्मा को प्राप्त करके कृतार्थ हो जाता है, इसीलिये वह स्वयं अपना मित्र है।

**प्रश्न**- जिसके शरीर, इन्द्रिय और मन जीते हुए नहीं है, उसको 'अनात्मा' कहने का क्या अभिप्राय है ? एवं उसका शत्रु की भाँति शत्रुता का आचरण क्या है ?

**उत्तर**- शरीर, इन्द्रिय और मन-इन सबका नाम आत्मा है। ये सब जिसके अपने नहीं हैं, उच्छृङ्खल हैं और यथेच्छ विषयों में लगे रहते हैं, जो इन सब को अपने लक्ष्यके अनुकूल इच्छानुसार कल्याण के साधन में नहीं लगा सकता, वह 'अनात्मा' है- आत्मवान् नहीं है।

ऐसा मनुष्य स्वयं मन, इन्द्रियाँ आदि के वश होकर कुपथ्य करने वाले रोगी की भाँति अपने ही कल्याणसाधन के विपरीत आचरण करता है। वह अहंता, ममता, राग-द्वेष, काम, क्रोध, लोभ, मोह आदि के कारण प्रमाद, आलस्य और विषयभोगों में फँसकर पाप-कर्मों के कठिन बन्धन में पड़ जाता है। जैसे शत्रु किसी को सुख के साधन से वञ्चित करके दुःख भोगने को बाध्य करता है, वैसे ही वह अपने शरीर, इन्द्रिय और मन को कल्याण के साधन में न लगाकर भोगों में लगाता है तथा अपने-आप को बार-बार नरकादि में डालकर और नाना प्रकार की योनियों में भटका कर अनन्त काल तक भीषण दुःख भोगने के लिये बाध्य करता है। यद्यपि अपने-आप में किसी का द्वेष न होने के कारण वास्तव में कोई भी अपना बुरा नहीं चाहता, तथापि अज्ञानविमोहित मनुष्य आसक्ति के वश होकर दुःख को सुख और अहित को हित समझकर अपने



Scanned with CamScanner

यथार्थ कल्याण के विपरीत आचरण करने लगता है- इसी बात को दिखलाने के लिये ऐसा कहा गया है कि वह शत्रु की भाँति शत्रुता का आचरण करता है।

जिसने मन और इन्द्रियों सहित शरीर को जीत लिया है, वह आप ही अपना मित्र क्यों है, इस बात को स्पष्ट करने के लिये अब शरीर, इन्द्रिय और मन रूप आत्मा को वश में करने का फल बतलाते हैं-

**जितात्मनः प्रशान्तस्य परमात्मा समाहितः।**
**शीतोष्णसुखदुःखेषु तथा मानापमानयोः॥**[२]

सरदी-गरमी और सुख-दुःखादि में तथा मान और अपमान में जिसके अन्तःकरण की वृत्तियाँ भलीभाँति शान्त हैं, ऐसे स्वाधीन आत्मावाले पुरुष के ज्ञान में सच्चिदानन्दघन परमात्मा सम्यक् प्रकार से स्थित हैं अर्थात् उसके ज्ञान में परमात्मा के सिवा अन्य कुछ है ही नहीं।

**प्रश्न-** शीत-उष्ण, सुख-दुःख और मान-अपमान में चित्त की वृत्तियों का शान्त रहना क्या है?

**उत्तर-** यहाँ शीत-उष्ण, सुख-दुःख और मान-अपमान शब्द उपलक्षण रूप से हैं। अत एव इस प्रसंग में शरीर, इन्द्रिय और मन से सम्बन्ध रखने वाले सभी सांसारिक पदार्थों का, भावों का और घटनाआ का समावेश समझ लेना चाहिये। किसी भी अनुकूल या प्रतिकूल पदार्थ, भाव, व्यक्ति या घटना का संयोग या वियोग होने पर अन्तःकरण में राग, द्वेष, हर्ष, शोक, इच्छा, भय, ईर्ष्या, असूया, काम, क्रोध और विक्षेपादि किसी प्रकार का कोई विकार न हो, हर हालत में सदा ही चित्त सम और शान्त रहे, इसी को 'शीतोष्ण, सुख-दुःख और मान-अपमान में चित्त की वृत्तियों का भलीभाँति शान्त रहना' कहते हैं।

**प्रश्न-'जीतात्मनः'** पद का क्या अर्थ है और इसका प्रयोग किसलिये किया गया है?

**उत्तर-** शरीर, इन्द्रिय और मन को जिसने पूर्णरूप से अपने वश में कर लिया है, उसका नाम 'जितात्मा' है, ऐसा पुरुष सदा-सर्वदा सभी अवस्थाओं में प्रशान्त या निर्विकार रह सकता है और संसार-समुद्र से अपना उद्धार करके परमात्मा को प्राप्त कर सकता है, इसलिये वह स्वयं अपना मित्र है। यही भाव दिखलाने के लिये यहाँ **'जितात्मनः'** पद का प्रयोग किया गया है।

**प्रश्न-'परमात्मा'** पद किस का वाचक है और **'समाहितः'** का क्या अभिप्राय है?

**उत्तर- 'परमात्मा'** पद सच्चिदानन्दघन परब्रह्म का वाचक है और **'समाहितः'** पद से यह दिखलाया गया है कि उपर्युक्त लक्षणों वाले पुरुष के लिये परमात्मा सदा-सर्वदा और सर्वत्र प्रत्यक्ष परिपूर्ण है।
इस प्रकार हम कह सकते हैं कि यदि हम अपने जीवन को सफल बनाना चाहते हैं, तो हमें सर्वतोभावेन मन को वश में रखने का प्रयास करना चाहिये।

**॥ सन्दर्भसूची ॥**


१. श्रीमद्भागवद्गीता में अध्याय-६, श्लोक संख्या-६

२. श्रीमद्भागवद्गीता में अध्याय-६, श्लोक संख्या-७




Scanned with CamScanner

# दिवाकरद्युतिः



वेदमार्तण्डाचार्यदिवाकरमहापात्राभिनन्दनग्रन्थः

Scanned with CamScanner

दिवाकरद्युतिः

(वेदमार्तण्ड-आचार्यदिवाकरमहापात्राभिनन्दनग्रन्थः)

प्रकाशिका –
अर्वाचीनसंस्कृतसाहित्यपरिषद्
सी ६२, अक्षरधाम टेनामेन्ट्स,
मथुरानगरी समीप, अक्षरचोक,
वडोदरा, गुजरात. 390020
२०१६

ISBN :978-93-827 13-15-9

प्रतिलिपयः - ३००
प्रकाशनवर्षम् – २०१६
मूल्यम् – ५००
प्राप्तिस्थानम् – वेदनिकेतनम्, लुहागडजागा, शंकरानन्दमथलेन्
तिआडिसाहि, पुरी- ७५२००१ , ओडिशा
दूरभाषा- ०९४३७६९७५३०

मुद्रणम् – Pagemaker Computer Services
117, Bapuji Nagar, Bhubaneswar - 751009



Scanned with CamScanner

| | | | |
|---|---|---|---|
| 20 | परमप्रतीक्ष्यसुरगुरूपमाचार्यश्रीमद्दिवाकरमहापात्रमहावैदिकानां सौप्रास्थानिकावसरे श्रद्धासुमनः समर्पणम् | आचार्यश्रीरवीन्द्रनाथभट्टाचार्यः | 37 |
| 21 | वैदिकशिरोमणिराचार्यदिवाकरमहापात्रः | प्रो. प्रलयकुमारनन्दः | 40 |
| 22 | छात्रवत्सला आचार्याः | प्रो. दुर्गाचरणषडङ्गी | 42 |
| 23 | प्रो. दिवाकरमहापात्रमहोदयानां कृते आवसरिकंनिवेदनम् | डॉ. अनुपमा शतपथी | 43 |


# द्वितीयभागः

## शास्त्रीयलेखाः


| क्र. सं. | विषयः | लेखकः | पृष्ठा |
|---|---|---|---|
| 24 | वेदोक्तं शिखास्थापनविज्ञानम् | प्रो.हृदयरञ्जनशर्मा | 45 |
| 25 | संस्कृतवाङ्मये मनोवैज्ञानिकः अभिगमः | डॉ. नरेन्द्रकुमार एल. पण्ड्या | 48 |
| 26 | मुनित्रयं नमस्कृत्य' इत्यत्र द्वितीया-विभक्ति-विचारः | प्रो. विनोदकुमारझा | 53 |
| 27 | संस्काराणां दार्शनिकं विश्लेषणम् | डॉ. रामराज उपाध्यायः | 58 |
| 28 | भविष्यपुराणे सद्वृत्तचिन्तनम् | डॉ. पूनमघाई | 63 |
| 29 | काव्यलक्षणविमर्शः | प्रो. अर्चना दुबे | 68 |
| 30 | शिक्षाग्रन्थेषु स्वरभक्तिविवेकः | डॉ. गोपालप्रसादशर्मा | 72 |
| 31 | वेदान्तदर्शनस्य अनुबन्ध चतुष्टयम् | डॉ. महेन्द्रकुमार अ. दवे | 78 |
| 32 | वैदिकी भागवती दीक्षा | डॉ.अमृतलालभोगायता | 82 |
| 33 | प्राचीनसाहित्यस्य परवर्तिसाहित्ये प्रभावः | डॉ.भावप्रकाश एम. गांधी | 85 |
| 34 | नैषधीयचरिते चित्रकलायाः निरूपणम् | डॉ. डायालाल एम. मोकरिया | 90 |
| 35 | वेदेषु अग्निस्वरुपविमर्शः | डॉ. निरञ्जनमिश्रः | 93 |
| 36 | कैवल्यदीपिकानिरुक्ताध्यारोपापवादविमर्शः | डॉ. जानकीशरणः | 97 |
| 37 | पाणिनीयव्याकरणे शिक्षाव्यवस्था | डॉ.गिरिधारी पण्डा | 103 |
| 38 | आधुनिकसंस्कृते संख्याप्रयोगविमर्शः | डॉ. दिपेशः कतिरा | 113 |
| 39 | स्त्रीधनम् | डॉ. सितान्सुभुषणपण्डा | 120 |
| 40 | भारतीयप्रतिभातत्त्वचिन्तनपरिप्रेक्ष्ये वामनो | डॉ. ललितपटेलः | 125 |




Scanned with CamScanner

# मुनित्रयं नमस्कृत्य' इत्यत्र द्वितीया-विभक्ति-विचारः

प्रो. डॉ. विनोद कुमार झा

**मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च। वैयाकरणसिद्धान्तकौमुदीयं विरच्यते॥**

अत्र सिद्धान्तकौमुद्याः मङ्गलाचरणे **'मुनित्रयं नमस्कृत्य'** इत्यत्र **'मुनित्रयम्'** पदे चतुर्थी कथं भवतीति प्रश्ने सति लघुशब्देन्दुशेखरे उत्तरयति- कारकविभक्तेर्बलवत्त्वाद् द्वितीयेति। अत्र-

**प्रश्नः**- नन्वत्र नमःपदार्थेन सह मुनित्रयस्य योगस्य सत्त्वात् 'हरये नमः' इत्यादाविव **"नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च"**[1]सूत्रेण **'मुनित्रयं नमस्कृत्य'** इत्यत्र **'मुनित्रयम्'** पदे चतुर्थी स्यादिति चेन्न ?

**उत्तरम्**- **"उपपदविभक्तेः कारकविभक्तिर्बलीयसी"** इतिपरिभाषया बलीयस्या कारकविभक्त्या बधितत्वात् न उपपदविभक्तिश्चतुर्थी भवति, **"स्वं रूपं शब्दस्याशब्दसञ्ज्ञा"**[2] इति सूत्रेण **"नमः स्वस्तिस्वाहास्वधाऽलं- वषड्योगाच्च"**इत्यादौ स्वरूपभूतस्यैव नमःपदार्थत्वेन विवक्षितत्वात्।

**उपपदविभक्तिः**- समीपस्थपदनिमित्तिका विभक्तिः उपपदविभक्तिः।

**कारकविभक्तिः**-

क्रियानिष्ठविशेष्यतानिरूपितक्रियाकारकभावसम्बन्धावच्छिन्नप्रकारताप्रयोजिका विभक्तिश्च कारकविभक्तिरभिधीयते, धात्वर्थफलानिष्ठा या विशेष्यता तन्निरूपिता क्रियाकारकभावेन कर्मतासम्बन्धेन अवच्छिन्ना या तण्डुलदेवादिनिष्ठा प्रकारता तत्प्रयोजिका विभक्तिः द्वितीया कारकविभक्तिः।

**प्रश्नः**- न च 'कारकविभक्तेर्बलवत्त्वाद् द्वितीया' इति लघुशब्देन्दुशेखरोक्तं प्रतीकमादाय स्त्रीलिङ्गेन विभक्तिशब्देन सह सामानाधिकरण्यात् 'बलवती' शब्दात्परं भावेऽर्थे 'त्व' प्रत्यये कृते पञ्चमीविभक्तौ बलवतीत्वादिति वक्तुमुचितमिति वाच्यम् ?

**उत्तरम्**- **"कृत्तद्धितसमासैः सम्बन्धाभिधानं भावप्रत्ययेन"** इति वार्तिकात् त्वप्रत्ययान्तेन बलवत्त्वशब्देन बलसम्बन्धस्यैव प्रतीतेः, बलसम्बन्धस्य स्त्रीषु पुंसु च साधारण्यात् ङीपमकृत्वाऽपि बलवच्छब्देन 'त्व' प्रत्यये तादृशरूपनिष्पत्तौ बाधकाभावात्। अत एव



Scanned with CamScanner

गन्धवत्त्वं पृथिव्या लक्षणमुच्यते, अन्यथा विशेष्यानुरोधात् तत्रापि गन्धवतीत्वमिति वक्तुमुचितम्।

**द्वितीयम् उत्तरम्-** यथा पूर्वं स्त्रीत्वाविवक्षया (लिङ्गसामान्यविवक्षया) कुक्कुटस्य अण्डपदेन सह समासं कृत्वा कुक्कुटाण्डमिति प्रयोगे निष्पन्ने कुक्कुटस्य अण्डासम्भवेन सामर्थ्यात् कुक्कुट्याः प्रतीतिः, समासोत्तरं पदार्थैकदेशत्वेन तत्र स्त्रीत्वविवक्षाया अभावेन ङीपः कर्तुमशक्यत्वात्, तथेहापि पूर्वं लिङ्गसामान्यविवक्षया 'त्व' प्रत्यये कृते पश्चात् वृत्तस्य= समासादिवृत्तिनिष्पन्नस्य विशेषणयोगो नेति नियमात् एकदेशे स्त्रीत्वान्वयस्यासम्भवात् ङीप् न भवति।

**प्रश्नः-** न च नमःपदार्थस्य मुनित्रयेण सह सम्बन्धे चतुर्थी कृधात्वर्थफलेऽन्वयविवक्षायां द्वितीया प्राप्नोतीति विषयभेदाद् द्वितीयाचतुर्थ्योः युगपत् प्राप्तिरेव नेति कथं तयोः परस्परं बाध्यबाधकभावश्चर्चितः इति वाच्यम्?

**उत्तरम्-** नमःशब्दस्य निपातत्वेन द्योतकतया द्योतकवाचकानां यत्र समभिव्याहारः तत्र एकान्तरप्रयोज्यत्वस्य निश्चये हेत्वभावात् विषयतायामुभयप्रयोज्यत्वस्य स्वीकारात्। **"नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च"** इत्यस्य नमःपदप्रयोज्यविषयतानिरुपिता या विषयता तत्प्रयोजकत्वेन तात्पर्यविषयीभूतात् चतुर्थी-इत्यर्थसत्त्वेन कृधात्वर्थफले मुनित्रयस्यान्वयस्य विवक्षणेऽपि विषयतायामुभयपदप्रयोज्यत्ववशात् नमःपदप्रयोज्यविषयतया निरुपिता या विषयता तत्प्रयोजकत्वेनापि तात्पर्यभूतं मुनित्रयपदमस्त्येवेति चतुर्थी प्राप्तैव इत्याशयेन बाध्यबाधकभावविचारो नानौचितीमावहति।

**प्रश्नः-** न च **'मुनित्रयं नमस्कृत्य'** इत्यत्र 'नमस्कृत्य' इति कृदन्तशब्दस्य योगे **"कर्तृकर्मणोः कृति"**[3] इति सूत्रेण अनुक्ते कर्मणि 'मुनित्रयम्' इत्यत्र परत्वात् द्वितीयां विभक्तिं प्रबाध्य षष्ठी विभक्तिः कथं न स्यादिति वाच्यम्?

**उत्तरम्-** 'ल्यप्' प्रत्ययस्य स्थानिवद्भावेन 'क्त्वा' प्रत्ययत्वेन 'नमस्कृत्य' इति 'ल्यप्' प्रत्ययान्तपदस्य 'क्त्वा' प्रत्ययान्तत्वात् **"क्त्वा तोसुन्कसुनः"**[4] इति सूत्रेण 'नमस्कृत्य' इत्यस्य अव्ययसंज्ञकत्वाच्च 'नमस्कृत्य' इति अव्ययपदस्य योगे **"न**



Scanned with CamScanner

**लोकाव्ययनिष्ठाखलर्थतृणाम्**"[५] इति सूत्रेण अनुक्ते कर्मणि 'मुनित्रयम्' इत्यत्र षष्ठ्याः विभक्तेः बाधात्।

**प्रश्नः**- न च 'नमस्' पदं द्विविधम् उपलभ्यते प्रथमन्तावत् स्वरादिगणपठितं द्वितीयञ्च ऊर्य्यादिगणपठितम्[६]।"**नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च**" सूत्रे पठितौ स्वाहास्वधाशब्दौ स्वरादिगणीयौ वर्तेते, तस्मात् तयोः साहचर्यात् स्वरादिगणपठितमेव 'नमस्' पदमत्र सूत्रे गृह्यतेतथा च स्वरादिगणपठितस्य 'नमस्' पदस्य योग एव चतुर्थी विभक्तिर्भवति। **'मुनित्रयं नमस्कृत्य'** इत्यत्र **'नमस्कृत्य'** इति पदे पठितं 'नमस्' पदं ऊर्य्यादिगणीयं वर्तते, तेन "**नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च**" सूत्रेण 'मुनित्रयम्' इत्यत्र चतुर्थी विभक्तिर्न भवतीति वाच्यम् ?

**उत्तरम्**-"**नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च**" सूत्रेण स्वरादिगणपठितस्य 'नमस्' पदस्य योग एव चतुर्थी विभक्तिर्भवतीति स्वीकारे 'रावणाय नमस्कुर्यात्' अत्र भट्टिप्रयोगे चतुर्थी विभक्तिर्न प्राप्नोति, तस्मादत्र "**नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च**" सूत्रे अविशेषेण अर्थात् स्वरादिगणपठितस्य ऊर्य्यादिगणपठितस्य च 'नमस्' पदस्य योगे चतुर्थी विभक्तिर्भवतीति बोध्यम्। एवम्प्रकारेण **'मुनित्रयं नमस्कृत्य'** इत्यत्र 'नमस्' पदस्य योगे **'मुनित्रयम्'** इत्यत्र चतुर्थी विभक्तेः प्राप्तित्वात्।

केचित्तु "**नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च**"इतिसूत्रे स्वस्तिसाहचर्यात् नमःपदं स्वरादिमात्रपठितमेव गृह्यते। तद्योगे एव सूत्रेणानेन चतुर्थीविधानात् प्रकृते नमस्कृत्येत्यत्र ल्यपः उत्पत्तये समासार्थं नमःपदस्य साक्षात्प्रभृतिगणेऽपि गतिसंज्ञार्थं पठितत्वेन स्वरादिगणमात्रपठितत्वाभावान्न मुनित्रयपदाच्चतुर्थी।

**प्रश्नः**- अविशेषेण नहि, अपितु "**नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च**" सूत्रेण स्वरादिगणपठितस्य 'नमस्' पदस्य योग एव चतुर्थी विभक्तिर्भवतीति स्वीकरणीयम्। 'रावणाय नमस्कुर्यात्' अत्र भट्टिप्रयोगे पठितं 'नमस्' अव्ययपदं स्वरादिगणपठितं वर्तते, तस्मादत्र चतुर्थी विभक्तिर्भवतीति न वाच्यम् ?

**उत्तरम्**- 'रावणाय नमस्कुर्यात्' अत्र पठितं 'नमस्' पदं स्वरादिगणपठितं वर्तते इति स्वीकारे सति 'नमस्' पदे सकारस्य स्थाने रुत्वे विसर्गे च कृते तस्य विसर्गस्य स्थाने



Scanned with CamScanner

"नमस्पुरसोर्गत्योः" इति सूत्रेण सकारो भवितुं न शक्नोति, कारणञ्चात्र गतिसंज्ञकस्य 'नमस्' पदस्य विसर्गस्य स्थान एव सकारस्य सत्त्वात् । गतिसंज्ञा च **"ऊर्यादिच्विडाचश्च"** इति सूत्रेण ऊर्यादिगणपठितस्यैव 'नमस्' पदस्य भवति, न तु स्वरादिगणपठितस्य। भवति चात्र विसर्गस्य स्थाने सकारः, तस्मादविशेषेणैव 'नमस्' पदस्य योगे चतुर्थी विभक्तिर्बोध्या ?

केषाञ्चित् मते-

**प्रश्नः-** नन्वेवं 'रावणाय नमस्कुर्यात्' इति भट्टिप्रयोगे चतुर्थी न स्यात्, **"नमस्पुरसोर्गत्योः"** इत्यनेन सत्वविधानार्थम् **"साक्षात्प्रभृतीनि च"**[9] इत्यनेन अपेक्षितायाः गतिसंज्ञायाः सिद्ध्यै साक्षात्प्रभृतिगणे पाठस्यावश्यकतया स्वरादिगणमात्रपठितत्वाभावात् इति चेत् ?

**उत्तरम्-** न तत्र **जयमङ्गलाटीकानुसारेण** सविसर्गस्यैव नमःकुर्यादिति पाठस्य सत्त्वेन साक्षात्प्रभृतिगणे तस्य पाठानङ्गीकारात् ।

**प्रश्नः-** न च 'स्वयम्भुवे नमस्कृत्ये'त्यत्र कथं चतुर्थी, तत्र **"समासेऽनञ्पूर्वे क्त्वो ल्यप्"**[10] इति सूत्रेण ल्यपो विधानाय समासस्य आवश्यकतया **"कुगतिप्रादयः"**[11] इत्यनेन विहितसमासे गतेरपेक्षिततया तत्सम्पादनाय साक्षात्प्रभृतिगणे पाठस्यावश्यकत्वेन स्वरादिगणमात्रपठितत्वाभावात् चतुर्थी न स्यादिति न शङ्कनीयम्, **उत्तरम्-** स्वयम्भुवमनुकूलयितुमित्येवं स्वीकृत्य **"क्रियार्थोपपदस्य च कर्मणि स्थानिनः"**[12]इत्यनेन चतुर्थ्या उपपादनात् । **"नमो वरिवश्चित्रङः क्यच्"**[13] इति सूत्रे 'नमस्यति देवान्' इत्यत्र चतुर्थीमाशङ्क्य **"उपपदविभक्तेरि"**ति परिभाषया भाष्ये समाहितम्, तदनुरोधेन शेखरोक्तं समाधानमिति मन्तव्यम् ।

**निष्कर्षः-** उपर्युक्तप्रकारेण **'मुनित्रयं नमस्कृत्य'** इत्यत्र चतुर्थी-विभक्तेः निषेधः "उपपदविभक्तेः कारकविभक्तिर्बलीयसी" इति परिभाषामाधारीकृत्यैव विधातव्यः।**'नमस्कृत्य'** इत्यस्य सिद्धिप्रक्रिया यथा- 'नमस्' इति पदं साक्षात्प्रभृतिगणे ऊर्यादिगणे वा पठितमस्ति, तस्मादस्य क्रमशः **"साक्षात्प्रभृतीनि च"** तथा च **"ऊर्यादिच्विडाचश्च"** इति सूत्रेण गति-संज्ञा, गति-संज्ञकात् 'नमस्' इति पूर्वपदपूर्वकात् 'कृ' धातोः **"समानकर्तृकयोः पूर्वकाले"**[14] इत्यनेन 'क्त्वा' प्रत्ययः, **"कुगतिप्रादयः"** इत्यनेन गतिसमासः, समासानन्तरं **"समासेऽनञ्पूर्वे क्त्वो ल्यप्"** इति सूत्रेण 'क्त्वा' प्रत्ययस्य स्थाने ल्यप्-प्रत्ययः, 'तुक्'



Scanned with CamScanner

आगमः, सकारस्य स्थाने रुत्वे विसर्गे च कृते "नमस्पुरसोर्गत्योः" इत्यनेन विसर्गस्य स्थाने सत्वविधानम्, "क्त्वा तोसुन्कसुनः" इति सूत्रेण अव्यय-संज्ञा अनन्तरं 'नमस्कृत्य'इति अव्यय-पदं सम्पन्नतां याति ।

सन्दर्भाः

| | |
|---|---|
| १. पा. अ. सूत्र.*- २/३/१६ | २. पा. अ. सूत्र.- १/१/६८ |
| ३. पा. अ. सूत्र.- २/३/६५ | ४. पा. अ. सूत्र.- १/१/४० |
| ५. पा. अ. सूत्र.- २/३/६९ | ६. आचार्य विश्वनाथमिश्रस्य सुबोधिनीहिन्दीटीकायुक्ते लघुशब्देन्दुशेखरे, सञ्ज्ञाप्रकरणे, पृष्ठसंख्या-चतुर्थे। अन्वेषणेन मया ऊर्यादिगणे 'नमस्' शब्दो न प्राप्तः। |
| ७. पा. अ. सूत्र.- ८/३/४० | ८. पा. अ. सूत्र.- १/४/६१ |
| ९. पा. अ. सूत्र.- १/४/७४ | १०. पा. अ. सूत्र.- ७/१/३७ |
| ११. पा. अ. सूत्र.- २/२/१८ | १२. पा. अ. सूत्र.- २/३/१४ |
| १३. पा. अ. सूत्र.- ३/१/१९ | १४. पा. अ. सूत्र.- ३/४/२१ |
| * पाणिनीय-अष्टाध्यायी-सूत्रपाठः | |

अध्यक्ष- व्याकरणसंकाय
श्रीसोमनाथसंस्कृतयुनिवर्सिटी,
वेरावल, गुजरात-३६२२६६



Scanned with CamScanner